5/6

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 866

Title: Prayoga Ratna

866

866

प्रयोगरत्न

Prayoga Ratna		Title
Nārāyana Bhatta		Author
		Editor
		Year, Vols.
		Publisher
866		Remarks

प्र०र०
॥१॥

श्रीगणेशाय नमः ॥ श्रीरामं सपरिवारं गणेशं च सरस्वतीं ॥ आश्वलायनतच्छिष्यप्रण-
म्य पितरं गुरुं ॥१॥ भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ॥ प्रयोगरत्नं कुरुते काश्यां वि-
श्वतुष्टये ॥२॥ ग्रंथिस्थितं गुणगणवत्तु मुच्यते चेत्त्वं ग्रंथं गुणगणवंतमाह कोन ॥ तत्सं-
तः शिरसि कृतांजलिः स्फुयाच्च शोध्यं तत्सदसद्धि विविच्यते मयायत् ॥३॥ अथ संस्काराः
ते चाष्टचत्वारिंशत् ॥ तथाह गौतमः ॥ गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामक-
रणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पंचा-
नां यज्ञानामनुष्ठानमष्टकापार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति ॥ सप्तपा-

रा०म०
॥१॥

कसंस्थाः ॥ अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रायणेष्टिर्निरूढपशु-
बंधः सौत्रामणिरिति सप्त हविर्यज्ञसंस्थाः ॥ अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वा-
जपेयोऽतिरात्रास्तोर्याम इति सप्त सोमयज्ञसंस्थाः ॥ इत्येते चत्वारिंशत्संस्काराः अष्टावा-
त्मगुणाः दया सर्वभूतेषु क्षांतिरनसूया शौचमनायासो मांगल्यमकार्पण्यमस्पृ- २
हेति यस्यैते चत्वारिंशत्संस्काराः अष्टावात्मगुणाश्च स ब्रह्मणः सायुज्यमाप्नोतीति ॥
पार्वणाः ॥ पार्वणस्थालीपाकः ॥ श्राद्धं मासि मासि ॥ श्रावणी तत्र कर्तव्यं श्रवणाकर्म ॥ आ-
ग्रहायणी तत्र कर्तव्यं प्रत्यवरोहणं ॥ चैत्री तत्र कर्तव्यः शूलगवः ॥ आश्वयुजी तत्र कर्तव्य-

॥प्र०र० माश्वयुजीकर्मेति हरदत्तो व्याचख्यौ॥ अंगिरसा तु पंचविंशति संस्कारा उक्ताः॥ पंच-
॥२॥ विंशति संस्कारैः संस्कृता ये द्विजातयः॥ ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयंत्रिताः॥
आदिशब्दाद्यजनादौ॥ गर्भाधानं पुंसवनं सीमंतो बलिरेव च॥ बलिर्विष्णुबलिः॥ जात
कृत्यं नामकर्म निष्क्रमोन्नाशनं परं॥ चौलकर्मोपनयनं तद्व्रतानां चतुष्टयं॥ तच्छब्देन
प्रसिधत्वाद्देदगृहयोत व्रतानां वेदव्रतानामित्यर्थः॥ स्नानोद्वाहौ चाग्रायणमष्टका
वयुथा तथं॥ श्रावण्याश्वयुज्यां च मार्गशीर्ष्यां च पार्वणं॥ उत्सर्गश्चाप्युपाकर्म महा ॥राम०॥
यज्ञाश्च नित्यशः॥ संस्कारा नियतास्त्वेते ब्राह्मणस्य विशेषतः॥ इति॥ आवश्यांश्रवणाक ॥२॥

र्मी इत्यादि पूर्ववद्व्याख्येयं॥ नियतानित्याः॥ एतेषां पंचविंशतीनां नैमित्तिकवार्षिकमा
सिकनित्यभेदेन चातुर्विध्यमाहाश्वलायनः॥ नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः
॥ सत्येवाग्रायणाद्याश्च संस्कारा वार्षिका मताः॥ मासिकं पार्वणं प्रोक्तमष्टकानां तु वार्षि-
कं॥ महायज्ञात्मका नित्याः स्युः संध्यावच्चाग्निहोत्रवदिति॥ अत्र गर्भाधानाद्या उपनयनांता
एव सर्वेषां नियतानतु स्नानाद्याः॥ तेन ब्रह्मचर्यादेव प्रव्रजेदित्यादि न विरुध्यते एते च।
द्विजानामेव समंत्रकाः॥ यदाह याज्ञवल्क्यः॥ ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो
द्विजाः॥ निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रिया इति॥ वेद्य॥ अवनेषामेव मंत्रतः कि

॥प्र० र०॥ यां इति वदन् शूद्रस्यामंत्रिकाः क्रिया इति सूचयति ॥ अत एव संस्कारानधिकृतस्य यमः
॥३॥ ॥ शूद्रोप्येवंविधः कार्यो विना मंत्रेण संस्कृत इति ॥ संस्काराः ॥ ॥ अथ स्वस्तिवाचनं
॥ तत्रेदं कर्तव्यं तदुच्यते ॥ व्यासः ॥ संपूज्य गंधमाल्याद्यैः ब्राह्मणान् स्वस्ति वाचयेत् ॥ ध
र्मकर्मणि मांगल्ये संग्रामाद्भुतदर्शने ॥ शेषं परिशिष्टे ॥ अथ स्वस्तिवाचनमभ्युद्धिश्रेर्वपु
ष्टिद्विर्विवाहांता अपत्यसंस्काराः ॥ प्रतिष्ठोद्यापने पूर्त्ते तत्कर्मणश्चाद्यंतयोः कुर्यादि
ति ॥ आश्वलायनस्मृतिः ॥ वैदिके तांत्रिके चादौ ततः पुण्याहवाच्यते ॥ शौनकः ॥ पुण्या ॥राम०॥
हवाचनविधिं वक्ष्यामोऽथ यथाविधि ॥ प्रयोक्तृकर्मणामादौ चांते चोदयेदिति ॥ तच्च ॥३॥

कर्मप्रयोगमध्यगमिति केचित् ॥ बहवस्तु प्रयोगबहिर्भूतमिति ॥ आद्यपक्षे कर्मप्रयोगसं
कल्पं कृत्वा कार्यं ॥ द्वितीये तु कृत्वा कर्मसंकल्पः ॥ अथ प्रयोगः ॥ प्रयोगपारिजातानुसा
रेणोच्यते ॥ यजमानः कृताभ्यंगादिः स्वलंकृतो दर्भपाणिः शुचिर्भूत्वा ॥ मंगलसंभारंसंभृ
त्य स्वलंकृतो दर्भपाणिः शुचिर्भूत्वा मंगलसंभारंसंभृत्य स्वलंकृते गृहे गोमयोपलिप्ते भू
मौ सोत्तरच्छदे भद्रासने उदङ्मुखः उपविश्य स्वदक्षिणपार्श्वे संस्कार्यं उदङ्मुखउपवेश्य
रंगवल्लिकायुक्ते पूर्वे तले प्रस्थपरिमितस्य शालेर्यान्यूनस्य धान्यस्योपरि दक्षिणोत्तरयोः
सुवर्णरजतताम्रमृन्मयान्यतमकलशद्वयमव्रणमनोहरमलंकृतं शुद्धं पुण्यजलपू

॥प्र०र० रितं सपल्लवं निधाय सूत्रवेष्टितो त्तरकलशो सुवर्णरजतमुक्तालाजावज्रप्रवालकं
॥५॥ पंचरत्नामिति प्रोक्तं सर्वकर्मसुपावनं ॥ पंचरत्नानि निक्षिप्य तदुपरि सितंतंदुलपूरितं स
फलं पात्रं निधाय तत्संनिधौ भद्रे शोभशास्नानप्रतिवचनसमर्थीस्त दिवसेश्चाद्य दिक्षुस्कं
व्रतोनिषिद्धप्रतिग्रह भिष्टनानरशुचीत्सो त्तरीयान्दर्भपवित्रपाणीन्युग्मान्ब्राह्मणाञ्शोभु
खानासने उपविश्यागंधपुष्पादिभिरभ्यर्च्य यथाचारं सुमुखश्चेत्यादिभिर्गणपतिं स्मृ
त्वा षोडशोपचारैरभ्यर्च्य उत्तरकलशे देवता आवाहयेत् ॥ तद्यथा ॥ कलशस्य मुखे ॥राम०॥
विष्णुः कंठे रुद्रस्समाश्रितः ॥ मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणास्थिताः ॥ कुक्षौ तु साग ॥५॥

राः सर्वे सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहितास्सर्वे
कलशं तु समाश्रिताः ॥ पुष्टिश्शांतिश्च गायत्री सावित्री च सरस्वती ॥ आयांतु यजमानस्य दु
रितक्षयकारकाः ॥ २ ॥ एवमेताः समावाह्य कलशे देवतास्ततः ॥ एतन्मंत्रस्थिता देवान्सं
पूज्य प्रार्थयेत्क्रमात् ॥ ३ ॥ ततः सर्वेषु कालेषु समस्तदेशेष्वशेषकार्येषु तथेश्वरेश्वरः सर्वस्व
रूपी भगवाननादिमान्ममास्तु मांगल्याभिवृद्धये हरिः ॥ ४ ॥ यत्र योगीश्वरः कृष्णो यत्र पार्थो
धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ५ ॥ अनन्याश्चिंतयंतो मां ये जनाः प
र्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ ६ ॥ स्मृते सकलकल्याणभाजनं य

॥प्र०र०॥ अजायते॥ पुरुषस्त्वजं नित्यं व्रजाभिशरणं हरिं॥७॥ सर्वेष्वारंभकार्येषु० सर्वमंगलमांग
॥५॥ ल्ये शिवे सर्वार्थसाधिके॥ शरण्ये त्र्यंबके गौरी नारायणि नमोस्तु ते॥८॥ तदेव लग्नं सुदि
नं तदेव ताराबलं चंद्रबलं तदेव॥ विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरामि॥९॥
इत्यादि यथाचारं पठित्वा॥ लक्ष्मीनारायणं नत्वा॥ ॐ दुर्गायै नम इति प्रणवं चतुर्थ्यंतं नामें
तनामाभिदुर्गांसेश्रयात्रं वास्तुपुरुषं मातापितनाचार्यान् इष्टदेवता कुलदेवता ग्रामदेवताः
सर्वादेवताः सर्वान् ब्राह्मणानितिसर्वान्प्रत्येकं नत्वा प्राणानायम्य देशकालौ संकीर्त्य मु ॥राम०॥
ककर्माकर्तुमादौ स्वस्त्यद्धिरस्त्वभ्युदयसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ब्राह्मणैः सहस्वस्तिपु ॥५॥

ण्याहवाचनमहं करिष्ये इति संकल्पयेत्॥ ततः सर्वे ब्राह्मणाः प्राङ्मुखस्तिष्ठेयुः॥ तद्दक्षि
णतः केतीनरकलशं बिभ्रदुदङ्मुखस्तिष्ठेत्॥ कर्ता दक्षिणपार्श्वे संस्कार्यं उदङ्मुखस्तिष्ठेत्॥ अ
थ कर्त्ता आपइत्युक्त्वा शिवा आपः संत्विति विप्रान्वाचयित्वा गंधा इत्युक्त्वा सुगंधाः पांत्विति
वाचयित्वा सुमनस इत्युक्त्वा सौमनस्यमस्त्विति वाचयित्वाक्षतान्भित्युक्त्वा अक्षतं चारिष्टं चा
स्त्विति वाचयित्वा दक्षिणा इत्युक्त्वा स्वस्ति दक्षिणाः पांतु बहुदेयमस्त्विति वाचयित्वा तं कल
शं पूर्ववन्निधाय दक्षिणं जान्वभूमौ निपात्य उदङ्मुखः अद्य अस्यादिस्कंज पित्वा पुनः सं क
लशमादाय धायो स्यायो दङ्मुखो मनः समाधीयतामित्युक्त्वा समाहितमनसः स्मइतिते

॥प्र०र० रुक्ते प्रसीदंतु भवंत इत्युक्त्वा प्रसंन्नाः स्म इति तै रुक्ते सर्वैः सह शांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टि
॥६॥ रस्तु ॥ वृद्धिरस्तु ॥ अविघ्नमस्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ स्वस्ति शिवं कर्मास्तु ॥ कर्मसमृ
द्धिरस्तु ॥ धर्मसमृद्धिरस्तु ॥ पुत्रसमृद्धिरस्तु ॥ वेदसमृद्धिरस्तु ॥ शास्त्रसमृद्धिरस्तु ॥ धनधा
न्यसमृद्धिरस्तु ॥ इष्टसंपदस्त्विति पंचदश वाक्यान्युक्त्वा स्वयं कर्मदेवतात्मको भगवान्प्र
जापतिः प्रीयतामित्युक्त्वा प्रीयतां भगवान्कर्मदेवतात्मकः प्रजापतिरिति तैर्वाचयित्वा
पुण्याहं वाचयिष्ये इत्युक्त्वा वाच्यतामिति तै रुक्ते उदात्ते वशाकुने सामगायसीतिस्व ॥राम०॥
चं सर्वैः सह पठित्वा ॐ पुण्याहं भवंतो ब्रुवंत्विति स्वयं मंदस्वरेणोक्त्वा ब्राह्मणैः पुण्या ॥६॥

हमिति तथोक्ते पुनरेवं मध्यमस्वरेणोक्त्वा तथैवं तै रुक्ते पुनरेवमुच्चस्वरेणोक्ते तथैव
तै रुक्ते स्वस्तिन इंद्रो वृद्धश्रवा इत्यृचं सर्वैः सह पठित्वा ॐ स्वस्ति भवंतो ब्रुवंत्विति पूर्ववदु
क्त्वा ॥ ॐ स्वस्तीति तथैवं तैः प्रत्युक्ते स्वस्त्यमुककर्मणो भवंतो ब्रुवंत्विति करिष्यमाणकर्म
नाम पूर्ववदुक्त्वा ॥ अमुककर्मणे स्वस्तीति तैः पूर्ववदुक्ते ऋध्याम स्तोमं मित्यृचं सर्वैः सह
पठित्वा ऋद्धिं भवंतो ब्रुवंतो ब्रुवंत्विति पूर्ववदुक्ते ॐ ऋध्यतामिति तैस्तथैव प्रत्युक्ते
सामात्यः प्राङ्मुख उपवेशयेत् ॥ ततो विप्राः प्राङ्मुखा उपविश्यानत्द्विकलशोदकं वि
शालेनाम्रपात्रनिनीय यजमानं सामात्यं मंत्रैरभिषिंचेयुः ॥ ते च मंत्राः ॥ ॥ तत्स

॥ प्र० र० ॥ वितुर्वरेण्यमित्यस्य विश्वामित्रः सविता गायत्री ॥ आपोहिष्ठेति नवर्चस्य सूक्तस्य अं-
॥ ७ ॥ बरीषः सिंधुद्वीप आपो गायत्री ॥ पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ ॥ आ
नोभद्रा इति दशर्चस्य राहूगणपुत्रो गोतमो विश्वेदेवास्त्रिपंचाद्याः सप्तमी च जगत्यः
षष्ठी विराट्स्थाना शिष्टास्त्रिष्टुभः ॥ अपनः शोशुचदघमित्यष्टर्चस्य कुत्सोग्निर्गायत्री
एतोन्विंद्रमित्यृचस्य आंगिरसस्तिरश्चिरिंद्रोनुष्टुप् ॥ स्वादिष्ठयेति दशर्चस्य मधुछं-
दाः पवमानसोमो गायत्री तरत्समंदीति तृचस्य अवत्सारः पवमानसोमो गा- ॥ राम ० ॥
यत्री ॥ शुचीवोहव्यमंत्रस्य वसिष्ठो मरुतस्त्रिष्टुप् ॥ यदंतियच्चेति वर्गद्वयस्य आघावसि ॥ ७ ॥

ष्टस्य ऋषिः शिष्यनामैकादशानां पवित्रवसिष्ठ्यावृषी ॥ पवमानसोमो गायत्री ॥ यत्ते
पवित्रमर्चिषीति द्वे अग्निर्देवते ॥ उभाभ्यां देवसवितरिति सवितृदेवत्या त्रिभिष्ट्वमिति
अग्निसवितृदेवत्या पुनंतु मामिति वैश्वदेवी ॥ आप्यायस्वेति पुनरुक्तिः ॥ पुनंतु मामि-
ति यः पावमानीरिति पावमानीर्या अध्येतीति चानुष्टुभः ॥ अग्निः शुचिव्रततम इति
विरूपोग्निर्गायत्री समुद्रज्येष्ठा इति सूक्तचतुष्टयस्य वसिष्ठ आपस्त्रिष्टुप् ॥ आयं ता
मित्यृचस्य सप्तर्षयो विश्वेदेवा अनुष्टुप् ॥ इममापः शिवतमा इत्यनेन तृचेन ॥ द्रु-
वस्येति यजुषा भूर्भुवः स्वरित्येताभिर्व्याहृतिभिः ॥ कुशाग्रैः सपद्मैवेरभिषिं

॥प्र०र०॥ चेयुः॥ततः सुवासिनीभिर्नीराजनं कार्यं यथाचारं॥ततो ब्राह्मणानां वैदिकमन्त्रा
॥८॥ शिषो आशिषः कर्मांते पितुरेवं कार्यं॥ ॥इति जयंतादिसंमतादिप्रयोगपारिजा
तोक्तः॥ ॥ अथ हेमाद्रौ दानकांडे बह्वृचगृह्यपरिशिष्टोक्तलेनोक्तः सकलसा
धारणशिष्टाचारप्राप्तश्च पुण्याहवाचनप्रयोगः॥कृतमंगलस्नानः स्वलंकृतः कृ
ताचमनः प्राङ्मुखो यजमानो वस्त्राच्छादितपीठे उपविश्य पत्नीं स्वदक्षिणतः प्राङ्मु
खीं उपवेश्यासंस्कार्यं चितयैवोपवेश्य॥ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्ण ॥राम०॥
कः॥लंबोदरश्च विकटो विघ्ननाशो गणाधिपः॥धूम्रकेतुर्गणाध्यक्षो भालचंद्रो ग ॥८॥

जाननः॥द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥विद्यारंभे विवाहे च प्रवेशे
निर्गमे तथा॥संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥शुक्लांबरधरं देवं शशिवर्णं
चतुर्भुजं॥प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये॥अभीप्सितार्थसिद्ध्यर्थं पूजितो
यः सुरासुरैः॥सर्वविघ्नहरे तस्मै गणाधिपतये नमः॥सर्वदा सर्वकार्येषु नास्ति ते
षां ममंगलं॥येषां हृदिस्थो भगवान्मंगलायतनं हरिः॥तदेव लग्नं सुदिनं तदेव ता
राबलं चंद्रबलं तदेव॥विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरामि॥यत्र
योगीश्वरः कृष्णो यत्र पार्थो धनुर्धरः॥तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम

प्र० र० सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः॥ देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्दनाः
॥१०॥ इति श्लोकान् पठित्वा॥ लक्ष्मीनारायणाभ्यां॰ उमामहेश्वराभ्यां॰ शचीपुरंदराभ्यां॰
मातापितृभ्यां॰ इष्टदेवताभ्यो॰ कुलदेवताभ्यो॰ सर्वेभ्यो ब्राह्मणेभ्यो॰॥ ॥आचम्य
प्राणायामो कृत्वा देशकालौ स्मृत्वा॥ अमुकफलसिध्यर्थं श्वो द्य वा अमुक कर्म करि
ष्ये॥ तदंगत्वया दौ पुण्याहवाचनादि करिष्ये इति संकल्पयेत्॥ यदा तु प्रयोगाद्बहि
र्भूतं पुण्याहवाचनाद्यंगं तदा अमुकफलसिध्यर्थं मम अमुककर्म कर्तुं अंगत्वेन तत्रादौ पु ॥राम०॥
ण्याहवाचनादि करिष्ये इति प्रत्येकं संकल्प्यः॥ प्रधानसंकल्पस्तु सर्वं कृत्वा॥ तद्धि ॥९॥

न एव श्वो वा कार्यः॥ ततो यजमानः षोडशोपचारैर्गणपतिं समभ्यर्च्य प्रार्थयेत्॥
ततः कर्ता स्वपुरतः मही द्यौः पृथिवी च न इति मंत्रावृत्त्या दक्षिणेन तरतो भूमिं स्पृ
ष्ट्वा॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिः॥ ॐ ओषधयः
समिति तत्रैव तंडुलपुंजं कृत्वा॥ ॐ ओषधयः संवदंते सोमेन सह राज्ञा॥ यस्मै कृ
णोति ब्राह्मणस्तं राजन्पारयामसि॥ आकलशेष्विति पुंजोपरि द्वौ सलक्षणौ धातु
मयौ मृन्मयौ वा कलशौ निधाय आकलशेषु धावति पवित्रे परिषिच्यते॥ उक्थै
र्यज्ञेषु वर्द्धते॥ इमं मे गंग इति तीर्थजलेन प्रत्येकं पूरयित्वा॥ इमं मे गंगे यमुने स

॥श्रा०र० रस्वतिस्रुतद्रिरितोमंसचतापरुष्ण्या॥ असिक्न्यामरुद्वृधे वितस्तयार्जीकीये शृणु-
॥१०॥ ह्या सुषोमया॥ गंधद्वारामितिगंधं कलशयोः प्रक्षिप्य चंदनादिना तावनुलिप्य पु-
ष्पमालाभूषितौ तौ कृत्वा॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभू-
तानां तामिहोपह्वये श्रियं॥ या ओषधीः इर्वा जाता॥१॥ कांडात्कांडात् इति दूर्वा॥२॥
अश्वत्थे वो॥३॥ स्योना पृथिवी॥४॥ याः फलिनी॥५॥ सहिरत्ना॥६॥ हिरण्यरूपः स-
हिरण्यसंदृ॥७॥ सुवा सुवासा॥८॥ पूर्णादर्वीति सतंडुलाभ्यां सफलाभ्यां पात्राभ्यां ॥राम०॥
कलशयोराननेपिदध्यात्॥ सर्वत्र प्रतिकलशं मंत्रावृत्तिः उत्तरसंस्थता च ततस्त- ॥१०॥

त्वायामीति शुनःशेपो वरुणस्त्रिष्टुप्॥ कलशे वरुणावाहने विनियोगः॥ ॐ तत्त्वा
यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशं
स मा न आयुः प्रमोषीः॥ उत्तरकलशे वरुणमावाहयेत्॥ चंदनादिना पूजयेच्च॥ त-
तः उत्तरकलशे देवता आवाहयेत्॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः॥ मू-
ले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा॥
ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः
अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा॥ आयांतु मम शांत्यर्थं दुरितक्षयका

॥प्र०र० रकाः॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयांतु मम शांत्यर्थं दुरितक्षयका
रकाः॥ इति तत्तत्कलशे अक्षितान्क्षिपेत्॥ मातृदेवो भव पितृदेवो भव॥ आचार्य
॥११॥ देवो भव॥ अतिथिदेवो भव॥ इति ततः अवनिकृतजानुमंडलः॥ कमलमुकुलसदृश
मंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा आशिषः प्रा
र्थयेत् प्रार्थनामाह एताः सत्या आशिषः संतु दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदा
नि चैव तेनायुः प्रमाणेन पुण्याहं दीर्घमायुरस्तु शिवा आपः संतु॥ सौमनस्यमस्तु॥ अ ॥राम०॥
क्षतं चारिष्टं चास्तु॥ गंधाः पांतु सुमंगल्यं चास्तु॥ अक्षताः पांतु आयुष्यमस्तु॥ पुष्पा ॥११॥

णि पांतु सौश्रियमस्तु॥ तांबूलानि पांतु ऐश्वर्यमस्तु॥ दक्षिणा पांतु बहुदेयं चास्तु
दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु॥ अ
त्र सर्वत्र ब्राह्मणैरस्त्विति प्रत्युत्तरं देयं॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः
शुभाः शोभनाः प्रवर्तंते॥ तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषि
मतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये विप्रा वाच्यतामिति वदेयुः
एवमुत्तरत्रापि यथायोग्यं प्रत्युत्तरं॥ ततो यजमानः भद्रं कर्णेभिः शृणुयाम देवा भद्रं
पश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ द्रवि

॥प्र०र०॥ गोदा इद्रविणस्तु रस्य द्रविणोदाः सनरस्य प्रयंसत्॥ द्रविणोदा वीरवती मिषं नो द्र
॥१२॥ विणोदा रासते दीर्घमायुः॥ सविता पश्चातात्सविता पुरस्तात्सविता नरात्तात्सविता
नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः नवानवा उ त्वादिवि दक्षिणावंतो अ
स्थुर्ये अश्वदाः सह ते सूर्येण॥ हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्रतिरंत आयुः॥
आपउंदंतु जीवसे दीर्घायुत्वाय वर्चसे॥ यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जो
हवीमि॥ जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां यस्मै त्वं सुकृते जात
वेद उलोकमग्ने कृणवः स्योनं॥ अश्विनं सपुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति॥ ॥राम०॥ ॥१२॥

संत्वाशिं वाभियजुषा प्रजा मायुः धनं च॥ व्रत नियमतः यःस्वाध्यायक्रतुदमनदाननवि
शिष्टानां ब्राह्मणानां मनः समाधीतां॥ विप्राः समाहितमनसः स्मः यजमानः प्रसीदंतु
भवंतः॥ विप्राः प्रसन्नाः स्मः॥ यजमानः शांतिरस्तु॥ पुष्टिरस्तु॥ तुष्टिरस्तु॥ वृद्धिरस्तु॥ अवि
घ्नमस्तु॥ आयुष्यमस्तु॥ आरोग्यमस्तु॥ शिवं कर्मास्तु॥ कर्मसमृद्धिरस्तु॥ वेदसमृद्धि
रस्तु॥ शास्त्रसमृद्धिरस्तु॥ पुत्रसंपदस्तु॥ धनधान्यसमृद्धिरस्तु॥ इष्टसंपदस्तु॥
अरिष्टनिरसनमस्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ यच्छ्रेयस्तदस्तु॥ उत्तरे कर्मण्यविघ्नम
स्तु॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु॥ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां॥

॥प्र०र० तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु॥ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः
॥१३॥ प्रीयंतां॥ तिथिकरणेमुहूर्त्तेनक्षत्रेसग्रहेसदैवतेप्रीयेतां॥ अग्निपुरोगाविश्वेदेवाः प्री
यंतां॥ इंद्रपुरोगामरुद्गणाः प्रीयंतां॥ विष्णुपुरोगासर्वेदेवाः प्रीयंतां॥ ब्रह्मपुरोगास
र्वेवेदाः प्रियंतां॥ महेश्वरीपुरोगाउमामातरः प्रीयंतां॥ वसिष्ठपुरोगाऋषिगणाः प्रीयं
तां॥ अरुंधतीपुरोगाएकपत्न्यः प्रीयंतां॥ ऋषयश्छंदांस्याचार्यावेदायज्ञाश्चप्रीयंतां
॥ ब्रह्मचब्राह्मणाश्चप्रीयंतां॥ श्रीसरस्वत्यैप्रीयेतां॥ श्रद्धामेधाप्रीयेतां॥ भगवती ॥राम०॥
कात्यायनीप्रीयतां॥ भगवतीमाहेश्वरीप्रीयंतां॥ [illegible]वै ष्टिकरीप्रीयेतां॥ ॥१३॥

भगवतीतुष्टिकरीप्रीयतां॥ भवतीरुद्धिकरीप्रीयतां॥ भगवतीवृद्धिकरीप्रीयेतां
भगवंतौविघ्नविनायकौप्रीयेतां॥ भगवान्स्वामीमहासेनः सपत्नीकः ससुतः स
पार्षदः सर्वस्याभगतः प्रीयंतां॥ हरिहरहिरण्यगर्भाः प्रीयंतां॥ सर्वाग्रामदेवता
प्रीयंतां॥ सर्वाकुलदेवताः प्रीयंतां॥ हता ब्रह्मद्विषः हताः परिपंथिनः हता अस्य
कर्मणाविघ्नकर्त्तारः शत्रवः पराभवं यांतु॥ शाम्यंतुघोराणि॥ शाम्यंतुपापानि ॥
शाम्यंत्वितयः शुभानिवर्द्धंतां॥ शिवाआपः संतु॥ शिवाऋतवः संतु॥ शिवाअग्न
यः संतु॥ शिवाआहुतयः संतु॥ शिवाओषधयः संतु॥ शिवावनस्पतयः संतु॥

॥प्र०र॥ शिवा अतिथयः संतु ॥ अहोरात्रे शिवे स्यातां ॥ निकामे निकामे नः पर्जन्यो वर्षतु फ
लवत्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पतां ॥ शुक्रांगारक बुध बृहस्पति शनै
॥२४॥ श्चर राहु केतु सोम सहिता आदित्य पुरोगाः सर्वे ग्रहाः प्रीयंतां ॥ भगवान्नारायणः प्रीय
तां ॥ भगवान्पर्जन्यः प्रीयतां ॥ प्रीयतां भगवान्स्वामी महासेनः ॥ पुण्याहकालान्वा
चयिष्ये ॥ वाच्यतां ॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ॥ वृषेव
वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्वतो नः शकुने पुण्यमावद ॥राम०॥
याज्यया यजति प्रतिविंध्यात् पुण्ये व लक्ष्मीः पुण्यां हैव लक्ष्मीः संनह्यति पुण्यां ॥१४॥

लक्ष्मीः संस्कुरुते ॥ यस्तु पुण्यं नक्षत्रं तद्बट् कुर्वीतोपव्युषं यदा वै सूर्य उदेति ॥ अथ नक्ष
त्रं नेति ॥ यावति नक्षत्रे योगं गच्छेत् ॥ यत्र जघन्यं पश्येत् ॥ तावति कुर्वीत यत्कारी स्यात् पु
ण्याह एव कुरुते ॥ तानि वा एतानि यमनक्षत्राणि ॥ यान्येव देवनक्षत्राणि ॥ तेषु कुर्वी
त यत्कारी स्यात् ॥ पुण्याह एव कुरुते ॥ मध्ये सह कुटुंबिने महाजनान्नमस्कुर्वीणा यास
शीर्वचनमपेक्षमाणाय अमुककर्मणः पुण्याहं भवंतो ब्रुवंतु ॥ इति त्रिर्वदेत् ॥ ॐ
पुण्याहमिति त्रिर्विप्राः ॥ ॐ स्वस्तये वायुमुपब्रवामहे सोमं स्वस्ति भुवनस्य यस्प
तिः ॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः ॥ आदित्य उदये

॥प्र॰१०॥ नीयः पथ्यये वेन स्वस्त्या प्रयंति पथ्यां वस्तिमभ्युदेति स्वस्त्याये वेनः प्रयंति स्वस्त्यु देति
॥२॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः
॥१५॥ स्वस्ति नो बृहस्पतिर्दधातु ॥ अष्टौ देवा वसवः सोम्यासश्चतस्रो देवीरजराः श्रविष्ठाः
ते यज्ञं पांतु रजसः पुरस्तात् ॥ संवत्सरीणममृतं स्वस्ति ॥ मह्यमित्यादि कर्मणा दूत्यं ते
पूर्ववत् ॥ स्वस्ति भवंतो ब्रुवंतु ॥ इति त्रिः ॥ ॐ आयुष्मते स्वस्ति ॥ इति प्रतिवचने त्रिः
ॐ रध्या भरतो मे सनु पाम वाजमानो मंत्रं सरथे हा पपातं ॥ यशो न घर्कं मधु गोष्वं ॥रा॰भ॰॥
तरामृतं शो अश्विनोः कामममप्राः ॥ सर्वान्न ह्वि मद्धुयामिति तं वेतजस सेव पुरस्तात् ॥१५॥

यंभवकं देवाभिर्मध्यनो क्षैरेरुपरिष्टाद्वायव्यास र्वतो द्वादशाहंपरिभूय सर्वान्न
ह्विमाभ्रीत्सर्वान्नह्विमभ्रोतिय एवं वेद ॥ रध्याम हव्यैर्नमसोपसद्य मित्रं देवं मि
त्रधेयन्नो अस्तु ॥ अनुराधान्हविषा वर्धयंतः शतं जीवेम शरदः सवीराः ॥ त्रीणि त्री
णि वै देवानामह्वानि त्रीणि छंदांसि ॥ त्रीणि सवनानि त्रय इमे लोकाः ॥ रध्याम
वत ह्वीर्य एषु लोकेषु प्रतितिष्ठति महस्मित्यादि अस्य कर्मणः स्वस्ति भवंतो ब्रुव
तु इति त्रिः ॥ ॐ रध्यतामिति प्रतिवचने त्रिः ॥ ॐ श्रीर्ये जातः श्रीय आनिर्याय श्री
यं वयो जरितृभ्यो दधाति ॥ श्रियं वसाना अमृतत्वमायन्भवंति सत्या समिधा

॥प्र०र० भिनद्रै॥ श्रियेवैनंनच्छ्रियामादधातिसंततमृचवषट्कृत्यंसंततस्यैसंधीयतेप्रज
॥१६॥ यापशुभिर्यएवंवेद॥ यस्मिन्नस्यप्यजयत्सर्वमेतत्॥ अमुंचलोकमिदमुंचसर्वं॥ त
त्रोनक्षत्रमभिजिद्धिजित्यश्रियंदधात्वहृणीयमानो॥ अहेर्बुध्न्यिपमंत्रंमेगोपा न२
य॥ यमृषयस्त्रयीविदाविदुः॥ ऋषिःसामानियजूंषिसाहिश्रीरमृतासतां॥ ए
तेमंत्रंनीराजनेकारयंति॥ मद्यभिस्सादिपूर्ववत्॥ अमुककर्मणःश्रीरस्त्वितिभ
वंतोब्रुवंतितिवृत्रिर्भूयात्॥ ॐअस्तुश्रीरितिविप्रास्त्रिः॥ वर्षशतंपूर्णमस्तु॥ शिवं ॥राम०॥
शिवमस्तु॥ गोत्राभिवृद्धिरस्तु॥ प्रजापतिःप्रियतां॥ शुक्रेभिरंगैरजआततन्वा ॥१६॥

न्कृतंपुनानःकविभिःपवित्रैः॥ शोचिर्वसानःपर्यायुरपांश्रीयोमिमीतेबृहतीरनू
नाः॥ तद्दथेषड्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे॥ आविक्षित
स्यकामप्रेर्विश्वेदेवाःसभासदइति॥ ततःउत्तरकलशंदक्षिणहस्तेदक्षिणकल
शंचवामहस्तेगृहीत्वा॥ नाभ्याधारांद्वयंसंततंपात्रेनिषिंचेत्भूमौवे॥ ॐवा
स्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअनमीवोभवानः॥ यत्वेमहेप्रतितन्नोजुषस्व
शन्नोभवद्विपदेशंचतुष्पदे॥ वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभि
रिंदो॥ अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व॥ वास्तोष्पतेशग्मयासं

॥प्र०र० मदानेमखीमहिरण्वथागातुमस्या॥ पाहिक्षेमउतयोगेवरंनोयूयंपातस्वस्तिभिः
सदानः॥ अमीवहावास्तोष्पतेविश्वारूपाण्याविशन्॥ सखासुशेवएधिनः शिवं
॥१७॥ शिवं॥ ततः कलशमतः पत्नीमुपवेश्य॥ पात्रपातितजलेनपंचकूर्चादिभिस्तद्
भर्तृसहिताअभिषिंचेयुस्तिष्ठंतिः॥ तत्रमंत्राः॥ समुद्रज्येष्ठाः सलिलस्यमध्यात्पु
नानायंत्यनिविशमानाः॥ इंद्रोयावज्रीवृषभोरराद ताआपोदेवीरिहमामवंतु
याआपोदिव्याउतवास्रवंतिखनित्रिमाउतवायाःस्वयंजाः॥ समुद्रार्थायाःशुचयः ॥राम०॥
पावकास्ताआ०॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां॥ म ॥१७॥

धुश्चुतः शुचयोयाः पावकास्ता०॥ यासुराजावरुणोयासुसोमोविश्वेदेवायासू
र्जंमदंति॥ वैश्वानरोयाः स्वग्निःप्रविष्टस्ता०॥ त्रायंतामिहदेवास्त्रायतांगणः॥ त्रायं
तांविश्वाभूतानियथायमरपाअसत्॥ आपइद्वाउभेषजीरापोअमीवचातनीः॥
आपः सर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं॥ हस्ताभ्यांदशशाखाभ्यांजिह्वावाचःपु
रोगवी॥ अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि॥ इमाआपःशिवतमाइमाः
सर्वस्यभेषजीः॥ इमाराष्ट्रस्यवर्द्धनीरिमाराष्ट्रभृतोमृताः॥ ताभिरिंद्रमभ्यषिंचत्प्र
जापतिः सोमंराजानंवरुणंयमंमनुं॥ ताभिरद्भिरभिषिंचामितामहंराज्ञस्त्वमधि

॥प्र०र० राजो भवेह॥ महांतं त्वा महीनां संम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनि
त्र्यजीजनत्॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पुष्णो हस्ताभ्यामग्नेस्तेजसा
॥१८॥ सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि॥ बलाय श्रियै यशसेन्नाद्याय॥ ॐ भू
र्भुवः स्वः॥ इंद्रियं वा एतदस्मिन्लोके यद्दधि यद्दध्नाभिषिंचतींद्रियमेवास्मिंस्तद्दधा
ति रसो वा एष ओषधिवनस्पतिषु यन्मधु यन्मध्वाभिषिंचति॥ रसमेवास्मिंस्तद्द
धाति तेजो वा एतत्पशूनां यद्घृतं यद्घृतेनाभिषिंचति॥ तेज एवास्मिं[illegible]के यद्दा ॥रा०म०॥
पो यदद्भिरभिषिंचत्यमृतत्वमेवास्मिंस्तद्दधाति सोभिषिक्तोभिषेक्त्रे ब्राह्मणाय हि ॥१८॥

रण्यं दद्यात्सहस्रं दद्यात्क्षेत्रं चतुष्पाद्दद्याद्दद्यात्यापाद्दुरसं दद्यान्नमेवापरिमितं द
ध्याद्परिमितो वै क्षत्रियो परिमितस्यावरुध्या इत्यथास्मै सुरकं संहरतः आदधाति
॥ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया॥ इंद्राय पातवे सुत इति तां पिबेद्य
द्त्रशिष्टं रसिनः सुतस्य यदिंद्रो अपिबच्छचीभिः॥ इदं तदस्य मनसा शिवेन सोमं रा
जानमिह भक्षयामि॥ अभित्वा वृषभा सुते सुतं सृजामि पीतये॥ तृंपा व्यश्नुही
मदमिति यो ह वाव सोमा जानमिह भक्षयामि॥ अभित्वा वृषभा सुते सुतं सृजामि
पीतये॥ तृंपा व्यश्नुही मदमिति यो ह वाव सोमपीथः॥ सुरायां प्रविष्टः स हैवैत

॥प्र०र०॥ नेंद्रेणमहाभिषेकेणाभिषिक्तस्यभक्षितोभवतिनसुरापीत्वाभिमंत्रयेताया
मसोमंशत्रोभवतितद्यथैवादः।प्रियःपुत्रःपितरंप्रियावाजायापतिंसुखंशिव
॥१९॥ मुपस्पृशत्याविस्रससंवंहैवैतेनेंद्रेणमहाभिषेकेणाभिषिक्तस्यक्षत्रियस्यसुरा
वासोमोवान्यद्वान्नाद्यंसुखंशिवामुपस्पृशत्याविस्रसः॥सुरास्त्वामभिषिंचंतु
ब्रह्माविष्णुमहेश्वराःवासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥२॥प्रद्युम्नश्चानि
रुद्धश्चभवंतुविजयायते॥आखंडलोग्निर्भगवान्यमोवैनैरृतिस्तथा॥३॥वरुणः ॥राम०॥
पवनश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्मणासहिताःसर्वेदिक्पालाःपांतुमेस ॥१९॥

दा॥४॥कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥बुद्धिर्लज्जावपुःशांतिकां
तिस्तुष्टिश्चमातरः॥४॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः॥आदित्यचंद्रमा
भौमोबुधजीवसितार्कजः॥५॥ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः॥देवदा
नवगंधर्वायक्षराक्षसपंन्नगाः॥६॥ऋषयोमनवोगावोदेवमातरएवच॥देवपत्न्यो
द्रुमानागादैत्याश्चाप्सरसांगणाः॥७॥अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥
औषधानिचरत्नानिकालस्यावयवाश्चये॥८॥सरितःसागराःशैलास्तीर्थानिजल
दानदाः॥एतेस्त्वामभिषिंचंतुसर्वकामार्थसिद्धये॥९॥तछेचोराचर्षीमहेगातुंय

॥प्र०र० शाय गातुं यज्ञपतये॥ देवी स्वस्तिरस्तु नः॥ स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगातु भेषजं
॥२०॥ शन्नो अस्तु द्विपदे शं चतुष्पदे॥ अमृताभिषेकोऽस्त्विति वदेयुः॥ ततः आचारप्राप्तव
स्त्रादिदानं॥ तत्परिधानं च एवं च बह्वृचगृह्यपरिशिष्टोक्तं शिष्टाचारप्राप्तं चैकीकृ
त्य पुण्याहवाचनमुक्तं॥ ॥इति श्री भट्ट हनुमत्कुटुम्बाणिक्य श्रीरामेश्वरभट्ट
सुत श्री नारायणभट्ट विरचिते प्रयोगरत्ने सकलकर्मोपयोगि पुण्याहवाचनप्रयो
गः॥ ॥ ॥ ॥अथ लौकानुसारेणानुकल्पपक्षमाश्रित्याङ्कुरार्पणप्रयोगः॥ ॥ ॥प्र०र०॥
गर्भाधानादिनामकर्मान्तकर्माणि हित्वा अन्नप्राशनादि विवाहान्तादितापत्सं से ॥२०॥

स्कारेषु अन्येषु च नवागारप्रवेशनादि शुभकर्मसु सद्योऽङ्कुरार्पणं कुर्यात्॥ तच्चैवं॥ दे
शकालौ स्मृत्वा अमुककर्मसाफल्यनिरन्तरशुभसंसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं म
ङ्कुरार्पणं करिष्य इति संकल्प्य शुद्धभूमिं गोमयेनोपलिप्य रंगवल्यादिभिरलंकृत्य
तत्र सिताक्षतानां त्रकीर्य किंचिद्भूमी रंजनं वेणुपात्रं सूत्रेण वेष्टयेत् देवपालिका स्वेन
संख्याप्य वल्मीकमृदं शुष्कगोमयचूर्णीं च तत्र प्रक्षिप्य पालिकामूलेषु तंतं
दुकूलेन पूरयित्वा दूर्वाकुराश्वत्थशिरीषबिल्वपत्राणि सुपरिशुभे शुद्धेन तन्तुनापात्रं नि
क्षिप्य तत्र सितरक्तहरिद्वर्णानि पुष्पाण्यवकीर्य मध्यादि पंचस्थानेषु पंचदेवान्प्र

॥प्र०र० जयेत्॥ तत्र ब्रह्मजज्ञानं ककुभो ब्रह्मा त्रिष्टुप्॥ अनेन पालिकामध्ये ब्रह्माणमावाह
॥२१॥ येत्॥ यत इंद्र भयामहे प्राशगाथो भर्ग इंद्रो बृहती॥ अनेन पूर्वभागे इंद्रमावाहयेत्॥ नो
केसुवर्णो भार्गवो वेणो यम[illegible]ष्टुप्॥ अनेन दक्षिणे यमं॥ तत्त्वायामि ब्रह्मणा अजीगर्तिः
शुनःशेपो वरुणस्त्रिष्टुप्॥ अनेन पश्चिमे वरुणं॥ सोमो धेनुं शरद्वश गोतमः सोमस्त्रि
ष्टुप्॥ अनेनोत्तरे सोममावाहयेत्॥ ब्रह्मणे नमः॥ आमनु मित्यादिक्रमेण षोडशोपचा
रैः पंचदेवताः सम्यगभ्यर्च्य पालिकापृथिव्यन्तः श्राद्धस्वस्तिष्टस्तु प्रतिष्ठेत्॥ दिशांपति ॥रम०॥
त्रमस्याभिसर्वकामफलप्रदान्॥ कुर्वंतु सफलं कर्म कुर्वंतु सततं शुभमिति॥ ततः अं ॥२१॥

ततं इल्लास्तोये न प्रक्षाल्य प्राच्यादिचतुर्दिक्षु बीजप्रतिनिधिस्तेन समंत्रं वापये
त्॥ तत्र यत इंद्रोत्साद्यस्य श्वेतारो मंत्राः प्रागुक्ताः॥ ०॥ इति श्रीनारायणभट्टकृ
ते प्रयोगरत्नेसंघे अंकुरार्पणप्रयोगः॥ अथाभ्युदयिकश्राद्धविधिः॥ ७॥ तत्र
गर्भाधानादिषु गर्भसंस्कारेषु जातकर्मादिष्वपत्यसंस्कारेष्वग्न्याधानादिषु श्रौत
कर्मसु श्रवणाकर्मादिषु वापीकूपतडागारामाद्युद्यापनादिषु देवप्रतिष्ठायां
वानप्रस्थाश्रमसन्यासस्वीकारे तु सा पुरुषादिमहादानादौ नवगृहप्रवेशे सोमहा
नाद्यादि वेदव्रतेषु राजाभिषेके शांतिकपौष्टिकेषु च सर्वेषु उपाकर्मोत्सर्जनियो

॥प्र०र० रथेकेन वार्यौ वा नयोरन्यत्राप्येवं विधिः कार्यः॥ इदमाभ्युदयिकश्राद्धं वृद्धस्य मातां च
मातृकापूजनमेकस्यानेकसंस्कारेष्वेककर्तृकेषु युगपदुपस्थितेषु सर्वदा सकृदेव
॥२२॥ तंत्रेण कार्यं न तु प्रतिसंस्कारमावृत्त्या॥ यथा देवदत्तेन जातकर्मादिकस्योपनयनका
ले जातकर्माद्यनुष्ठाने देशादेशांतरागतस्य मतेर्बुध्याकृतौर्ध्वदेहिकस्यागतस्य पुन
र्जातकर्मादिसंस्काराणां विहितानां युगपदनुष्ठाने कर्मनाशाजलस्पर्शादीनां प्राय
श्चित्तं तथा पुनःसंस्काराणां युगपदनुष्ठाने वा॥ तदुक्तं ब्रह्मपुराणे॥ गणेशः क्रियमाणा ॥श्री॥
नां मातृकापूजनं सकृत्॥ सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु इति तत्राभ्युदयिक ॥२२॥

श्राद्धे कव्यमानुष्यो दैव्यश्च द्विविधा मातरश्राद्धेः इज्याः॥ तत्र मानुष्या मातरोऽष्टौ
मातृपितामही प्रपितामह्यः मातामही मातुःपितामही मातुःप्रपितामही तिस्रः॥ पि
तृष्वसा मातृष्वसा चेति॥ ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपाः॥ ब्राह्म्याद्याः
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथेंद्राणी चामुंडा सप्त मा
तरः॥ दुर्गाक्षेत्राधिपतिं गणाधिपतिं च पूजयेत्॥ तथा कात्यायनः॥ कुड्यलग्नां वसो
र्धारां पंचधारां घृतेन तु॥ कारयेत्सप्तधारां वा नातिनीचां न चोच्छ्रितां॥ गौरी पद्मा श
ची मेधा सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पु

॥प्र०र० ष्टिस्तथास्तु ष्टि रात्मदेवतया सहेति॥ आत्मदेवता कुलदेवतेति॥ आयुष्याणि चतुरं
॥२३॥ स्यर्थं जपेदत्र समाहितः॥ आयुष्याणि आनो भद्रा इत्यादीनि॥ ततो वृद्धिश्राद्धं नवदैव
त्यं॥ पार्वणत्रयमात्रकं॥ तत्र क्रममाहाश्वलायनाचार्यः॥ माता पितामही चैव संप्र
त्याप्रपितामही॥ पित्रादयस्त्रयाश्चैव मातुः पित्रादयस्त्रयः॥ एते नवार्चनीयाः स्युः पि
तरो वृद्धये द्विजैरिति॥ यत्तु वृद्धवसिष्ठः॥ नांदीमुखे विवाहे च प्रपितामहपूर्वकं॥ ना
मसंकीर्तयेद्विद्वानन्यत्र पितृपूर्वकमिति॥ स्मृत्यर्थसारश्च॥ वृद्धौ मुख्यास्तु पितरो वृद्ध ॥राम०॥
श्राद्धेषु भुंजतेति॥ एतच्छाखांतरविषयकं॥ आश्वलायनानां तु आनुलोम्येन मात्रा ॥२३॥

दिक्रमेण वा॥ आश्वलायनाचार्यवचनात्॥ यत्तु ब्रह्मपुराणे॥ पिता पितामहश्चैव
तथैव प्रपितामहाः॥ त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्तिताः॥ तेभ्यः पूर्वत्रयो ये तु
ते तु नांदीमुखाः स्मृता इति तत्तो महालयप्रकरणपठितप्रोष्ठपद्यापौर्णमासी निमि
त्तकश्राद्धविषयं तत्॥ प्रकरणपाठादित्येवं हेमाद्र्यादय ऊचिरे॥ इह च नांदीमुखसं
ज्ञकास्मात्रादीनुद्दिश्यात्॥ विष्णुपुराणे॥ कन्याविवाहादीन्नन्तु क्रम्य॥ नांदीमुखान्पि
तॄन्नादौ तर्पयेत्सुपतो गृही॥ त्युक्तेः॥ ब्रह्मपुराणे च जन्माद्यनुक्रम्या पितॄन्नांदीमुखा
नाभ नर्पयेद्द्विद्विपूर्वकमित्युक्तेः॥ वृद्धपराशरेण तु देवानामपि नांदीमुखविशे

॥प्र० र०॥ षणमुत्क्रमतः॥ नांदीमुखेभ्यो देवेभ्यः प्रदक्षिणं कुशासनमिति॥ वृद्धिश्राद्धे च का
र्यः॥ कर्माहात्पूर्वेद्युः मातृपार्वणं कर्माहे पितृपार्वणं॥ कर्मोत्तराहे मातामहपार्वण
॥२४॥ मिति॥ अस्यासंभवे कर्माहात्पूर्वेद्युरेव पूर्वाह्णे मातृकं मध्याह्ने पैतृकं अपराह्णे माता
महानां॥ अस्यासंभवे आह वृद्धमनुः अलाभे श्राद्धकालानां नांदीश्राद्धत्रयं बुधः॥
पूर्वेद्युरेव कुर्वीत पूर्वाह्णे मातृपूर्वकमिति॥ इदं च महत्सु कर्मसु॥ अल्पेषु तु कर्मा
अहमेव श्राद्धं॥ पुत्रजन्मनि तु दिने वा रात्रौ वा भुक्तवतोपवासिना वा पुत्रजन्मा ॥राम०॥
नंतरमेव कार्यं॥ अत्र संकल्पाद्यो विशेषः संग्रहे॥ शुभाय प्रथमा ते महद्वृद्धौ संकल्प ॥२४॥

माचरेत्॥ न चेत्स्यार्थी देवा कुर्यान्महादोषो भिजायते॥ अतस्मद्दुशाटानामरू
पाणामगोत्रिणां॥ अनाम्नां तिलाद्येश्च नांदीश्राद्धं च सव्यवत्॥ कारिकां च॥ सं
बंधनामरूपाणि वर्जयेदत्र कारिणा॥ अत्र सत्यवसू विश्वेदेवौ॥ तत्रस्थाने द्वौ विप्रौ
मात्रादीनां च प्रत्येकं द्वौ द्वौ॥ एवं विंशति ब्राह्मणाः॥ यद्वा मात्रादीनां त्रयाणां द्वौ द्वौ
॥ एवमष्टौ॥ अत्र नापसव्यं तिलस्थाने यवाः एवं स्वधास्थाने स्वाहा॥ प्राङ्मुखः॥ सव्य
जानुनिपातनाभावः॥ नाम्ना प्रदाने शाश्रुखव एव कुर्यात् दक्षिणमुपवीतोत्तरीय यु
दर्भैः क्रियेत्सादयो विशेषाग्रंथांतरेतो ज्ञेया॥ पिंडदाने कुलदेशाचारतो व्यवस्था॥

॥श्रा०र०॥ भविष्यत्पुराणे ॥ पिंडनिर्वापणं कुर्यान्नवा कुर्यान्नराधिपः ॥ वृद्धिश्राद्धे महाबाहो
॥२५॥ कुलधर्मानवेक्ष्य तु ॥ पिंडदानपक्षे विशेषो वसिष्ठेनोक्तः ॥ दधिकर्कंधुसंमिश्रा
न्पिंडान्दद्याद्यथाक्रमं ॥ कर्कंधु बदरीफलं ॥ तथा च प्रदक्षिणोपचारेण दध्यक्षत
फलोदकैः ॥ प्राङ्मुखो निर्वपेत्पिंडान् दूर्वायां बदरीयुतान् ॥ ब्रह्मपुराणे ॥ स्थाल्यन्नं द
धिमद्वक्तं बदरा ॥ लियवांस्तथा ॥ मिश्रीकृत्य तु चत्वारि पिंडांश्च फलसन्निभानिति ॥
विकीरं च लयाद्दद्याद्यमांश्चानियमं विना ॥ भूयात्तप्रेषु संपन्नं वृद्धिश्राद्धे समाहितः ॥राम०॥
कात्यायनः ॥ द्वौ द्वौ चाभ्युदये पिंडावेकैकस्मै विनिक्षिपेत् ॥ एकं नाम्ना परं तूष्णीं ॥२५॥

दद्यात्पिंडान्नरस्य कृत्स्य यकृ ॥ तत्रैकः प्रथमपिंडः समंत्रको नामगोत्रेण देयः ॥ द्वितीय
स्तूष्णीमिति ॥ नांदीमुखानां कुर्वीत प्राज्ञः पिंडोदकक्रियां ॥ प्राजापत्येन तीर्थेन यच्च
किंचित्प्रजायते ॥ दद्यात्पिंडद्वयं विंति बुध इति चतुर्विंशतिमतात् ॥ अन्ये च बहवो
विशेषा ग्रंथांतरतो ज्ञेयाः ॥ दाक्षिणात्यानां विस्तृत वृद्धिश्राद्धाचाराभावान्नेहोच्यं
ते ॥ अथाभ्युदयिकैककर्तृनिर्णयः ॥ साख्यणीये ॥ नांदीश्राद्धं पिता कुर्यादाद्ये पाणि
ग्रहे बुधः ॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं ॥ द्वितीये पाणिग्रहादौ वरएव कुर्या
दित्यर्थः ॥ कात्यायनः ॥ स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ॥ पिंडदानोद्वाह

॥प्र०र॰ नां तेषां तस्याभावे तु तत्क्रमात् ॥ तेषां सुतानामोद्वाहनात्प्रथम विवाहपर्यंतं पि
ता स्वपितृभ्यः पिंडान्नं दद्यादुपलक्षितं वृद्धिश्राद्धं कुर्यात् ॥ तस्य पितुरभावे तु तस्य संस्का
॥२६॥ र्यस्य पितृव्यणां यः क्रमस्तेन क्रमेण पितृव्याचार्यमातुलादिः श्राद्धं दद्यात्स्वपितृभ्य
इति हेमाद्रिणा व्याख्यातं ॥ जीवपितृकस्तु पितृमात्रादिभ्यो वृद्धिश्राद्धं कुर्यात् ॥
वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति ॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः
एतत्साग्निकविषयमित्येके ॥ विष्णुः ॥ पितरि जीवति यः श्राद्धं कुर्यात्स येषां पि ॥राम०॥
ता कुर्यात्तेषां कुर्यात् पितरि पितामहे च येषां प्रपितामहः पितरि पितामहे प्रपिता ॥२६॥

भवंतु मे प्रीताः प्रयच्छंतु च मंगलमित्युक्त्वा कृतांजलिः सम्प्रार्थ्य प्रणिपत्य ब्राह्म
णान्विसृज्याचम्य गौर्यादि विसर्जयेत् ॥ ○ ॥ अथ तोपि संक्षिप्तः शिष्टैः क्रियमा
णो वृद्धिश्राद्धप्रयोगः ॥ ○ ॥ पूर्ववद्गौर्यादीनां ब्राह्मणादीनां च पूजां कृत्वा सदुर्वा
कुरानक्षतान्गंधजलं चादाय सत्यवसुसंज्ञका विश्वेदेवा भूर्भुवः स्वः इदं वः पाद्यं ॥
मातृपितामहीप्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः इदं वः पाद्यं ॥ पितृपिता
महप्रपितामहाः नांदीमुखाः सपत्नीकाः भूर्भुवः स्वः इदं वः पाद्यं मातामहमा
तुः पितामहमातुः प्रपितामहाः नांदीमुखाः सपत्नीकाः भूर्भुवः स्वः इदं वः पा

॥प्र०२० द्य मिलित्वा सर्वत्र पात्रे सदूर्वाक्षतं जलं क्षिपेत्॥ एवमेव पुनः सत्यादीन्विश्वे
देवा मात्रादीः पित्रादीन्मातामहादींश्च त्रीन् संबुध्योक्त्वा इदं वो ह्यामिति मिरिदमा
॥२९॥ सनगंधाद्युपचारकल्पनं स्वाहा न मम इति दूर्वाक्षत गंध पुष्प जलानि क्षिप्त्वा प्रत्येकं
पात्रे निक्षिपेत्॥ ततो विनायकाद्याः गौर्यादिषोडशमातरो ब्रह्मादि सप्तमातर
श्च भूर्भुवः स्वः इदं दास्यमानं वा युग्मब्राह्मणभोजनपर्याप्तमन्नं यथाशक्ति सो
पस्करमन्नं तद्रूपेण स्वाहा न मम इति दूर्वादीन् निक्षिपेत्॥ एवं विश्वेभ्यो देवेभ्यो मात्रा ॥राम०५
दिभ्यः पित्रादिभ्यो मातामहादिभ्यः सपत्नीकेभ्यः संबुध्य दद्यात्॥ अन्नासंभवे ॥२९॥

दास्यमानं वा सोपस्करमाममिति वदेत्॥ तच्च चतुर्गुणं द्विगुणं समं वा अन्नपद
स्थाने शान्त्या संकल्पयेत्॥ आमासंभवे पि युग्मब्राह्मणभोजनपर्याप्ताद्दगुणं
चतुर्गुणं द्विगुणं समं वा हिरण्यं हिरण्यप्रतिनिधिभूतं द्रव्यं चेति वदेत्॥ शक्त्या
संकल्पयेत्॥ एवं दशाभ्यः संकद्विगुणं कल्पयेत्॥ ततः शर्वविदुपास्मै इत्यादि पंच
र्चः श्रावयित्वा कृतस्य वृद्धिश्राद्धस्य संपूर्णतासिद्ध्यर्थं द्राक्षामलकेन तत्प्रतिनिधि
त्वेन द्रव्यं वा दक्षिणां संप्रददे न मम इत्युक्त्वा प्रजापते न त्वदिति मंत्रं जप्त्वा अनेन
नांदीश्राद्धेन नांदीमुखदेवताः प्रीयंतां वृद्धिरस्तु॥ मातापितामही चेति ऊं

॥प्र०र०॥ श्लोकद्वयं जपेत्॥ ततः आचारतः किंचिद्द्रव्यं इत्वाभय इति मंत्रं जपन्संकल्पपा
॥३०॥ त्रेणसंघदाने वृशाद्धं कुर्यादिति॥ ततो मातृविसर्जयेत्॥ जीवन्मातृकस्यन मातृ
पार्वणं॥ जीवन्मातामहस्यन मातामहपार्वणं द्वारलोपात्॥ जीवत्पितृकस्तु ये
भ्यः पिता दद्यात्तेभ्यो दद्यादित्युक्तमेव॥ ❁ ॥इति श्री भट्टरामेश्वरसूनुनारा
यणभट्टविरचित प्रयोगरत्ने वृद्धिश्राद्धप्रयोगो निर्णयसहितः॥ ❁ ॥अथ कौ
तुकबंधनप्रयोगः॥ ॥स च प्रचुराचाराभावात्संक्षेपतः सूत्रादिमात्रं गृहीत्वालि ॥राम०॥
ख्यते॥ आचार्यो दर्भमयकूर्चे उदकुंभं निधाय साक्षतं कांस्यपात्रे पंच गुणीकृ ॥३०॥

महे च नैव दद्यादिति॥ आश्वलायनश्च ह्यपरिशिष्टे तु॥ जीवत्पिता सुतसंस्का
रेषु मातृमातामहयोः कुर्यात्॥ तस्य जीवत्यां मातामहस्यैव कुर्यादिति॥ अ
थारयशिष्टप्रचुराचारपरिगृहीतसंकल्पविधेः प्रयोगः॥ उपनयनादिमत्सु
हकर्मसु जातकर्मसु ष्टवेंधेषु जातकर्मादिघल्प्यकसुतस्य हरेव नांदीश्राद्धं कुर्यात्
तत्रादौ कर्त्ता कृतमांगलिकस्नानो धौतवासाः कृतस्वस्त्ययनो नांदीश्राद्धपूर्वां
गंमातृकापूजनं कुर्यात्॥ तद्वेत्थं॥ गोमयोपलिप्ते रंगवल्ल्यादिभिरलंकृते आर्द्र
स्थले प्रतिमोत्स्वस्तत पुंजेषु द्विजातिपु वा यथालाभं संकल्प्य प्रत्येकं मातृ पिता

॥प्र०र० महिप्रपितामहीमातामहीमातृपितामहीमातृप्रपितामहीपितृस्वसृमातृ
॥२७॥ स्वस्राद्याश्रेष्ठमातृषमातेयथासंभवं॥यद्वापूर्वोक्तविभागकाद्यागौर्यादि
षोडशमातृः ब्राह्म्यादिसप्तमातृदुर्गाक्षेत्रपालगणाधिपं च प्रत्येकं कांडानुस
मयेनपदार्थानुसमयेनवाप्रणवादिनामांतनममंत्रेस्वाहानादिभिश्चयेत्
यद्वा॥गौर्यादिषोडशमातृभ्योनमः॥ब्राह्म्यादिसप्तमातृभ्योनमइतिसंक्षे
पेणसमुद्दिश्यरूपेणार्चयेत्॥ततः आनोभद्राइत्यादिशांतंजीवइत्यादिचसू ॥राम०॥
क्तंपठित्वानांदीश्राद्धसंकल्पंकुर्यात्॥ततोपवीतिप्राङ्मुखस्तिथ्यादिसंकी ॥२६॥

र्त्यसत्यवसुसंज्ञकाविश्वेदेवाःनांदीमुखामातृपितामहीप्रपितामह्यःअमु
कगोत्राःनांदीमुखाःपितृपितामहप्रपितामहाःअमुकगोत्राःनांदीमुखाः
मातामहप्रमातुःपितामहमातुःप्रपितामहाःअमुकगोत्राःसपत्नीकाःए
तानुद्दिश्यसंकल्पविधानेननांदीश्राद्धंकरिष्येइतिसंकल्प्यलक्षणलक्षि
तान्विंशतिसंख्याकानष्टकंसंख्याकान्वाब्राह्मणान्वृवेद्युःसद्योवादेवपू
र्वकंनिमंत्र्यहस्तापयंगस्नानान्वीहपरिचारकैराकार्यसंबंद्धोन्याततेषांपा
दान्प्रक्षाल्यप्राङ्मुखानुपवेश्यषष्ठीविभक्त्यैकस्यजुहूर्मियुग्मान्यासनं

॥प्र०र०॥ प्रदायापः अघ्रायदक्षं दत्वा द्वितीयार्घ्यं मंत्रेण माषाश्च मंत्रं पुष्पमाल्यधूपदी
॥२८॥ पाच्छादनाभरणानि प्रथमयार्घ्यार्हिर्दत्वा मधूरद्रव्यसहितमन्नमन्नं परिविष्य
पृथिवीतेपात्रमित्यादि कृत्वा चतुर्थ्यां कृत्वा स्वाहा हव्यं नमम इति सवित्र्यत्कान्त
ते पुयास्मैगायतेतिपंचानां काश्यपोसितः सामो गायत्री जपे विनियोगः॥ एताः
पंचर्चः श्रावयित्वा तेरुत्तरपोशनादो कृते हस्तशुध्यादिकं कृत्वा शक्षामलके
तत्निष्क्रयं वा दक्षिणां दत्वा ॐ मातापितामही चैव तथैव प्रपितामही॥ पितापि ॥राम०॥
तामहश्चैव तथैव प्रपितामहाः॥ मातामहस्तत्पिता च प्रमातामहकादयः॥ एते ॥२८॥

तं कार्पाससूत्रं निधाय तत्समीपे प्राङ्मुखं यजमानमुपवेश्य सकुशाहस्तैः सकुंभो
केंदेन तत्सूत्रं मंत्रैरभिषिंचेत्॥ ते च मंत्राः॥ तत्सवितुर्विश्वामित्रः सविता गायत्री
अग्निमीलेन व मधुच्छंदा अग्निर्गायत्री॥ सूत्रप्रोक्षणे विनियोगः॥ एवमुत्तरत॥ इषे
त्वोर्जेत्वा॥ अग्न आयाहि वीतये॥ शन्नो देवीरभिष्टये॥ आपो हि ष्ठेति नवर्चस्य सूक्त
स्याम्बरीषः सिंधुद्वीप आपो गायत्री॥ पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अ
नुष्टुभौ॥ एतान्विंद्र मे गिर स्सिरध्विरिंद्रो नुष्टुप्॥ स्वतं चेति तच्च स्या घृमषिलो
मा वेदतोनुष्टुप्॥ प्रशद्धा यस्या वाश्वो मरुतो जगती॥ स्वस्ति नो मिमीतां स्वस्त्या

॥ऋ०१०॥ त्रयो विश्वेदेवास्त्रिष्टुप्॥ स्वादिष्ठयेति दशर्चस्य सूक्तस्य मधुच्छंदाः पवमानसो
मो गायत्री॥ रक्षोहणमिति पंचविंशत्यृचस्य सूक्तस्य भारद्वाजः पायुरक्षोहाग्नि
॥३१॥ स्त्रिष्टुप्॥ अंत्यास्तिस्रोऽनुष्टुभः रात्री व्यख्यदित्यष्टर्चस्य सूक्तस्य सोभरः कुशिका
रात्रिर्भारद्वाजी रात्रिस्तवं गायत्री॥ कृणुष्वेति पंचदशर्चस्य सूक्तस्य वामदेवो रक्षो
हाग्निस्त्रिष्टुप्॥ तरत्स मंदीति चतुर्ऋचोऽवत्सारः पवमानसोमो गायत्री॥ सहस्र
शीर्षेति षोडशर्चस्य सूक्तस्य नारायणः पुरुषोऽनुष्टुबंत्या त्रिष्टुप्॥ विष्णोर्नु ॥राम०॥
कमिति षडृचस्य सूक्तस्यौचथ्यो दीर्घतमा विष्णुस्त्रिष्टुप्॥ अतो देवा इति ष ॥३१॥

ळृचस्य सूक्तस्य काण्वो मेधातिथिर्विष्णुर्गायत्री॥ परो मात्रयेति सप्तर्चस्य सूक्त
स्य मैत्रावरुणो वसिष्ठो विष्णुस्त्रिष्टुप्॥ हिरण्यवर्णामिति पंचदशर्चस्य सूक्त
स्यानंदकर्दमचिक्लीतेंदिरासुता ऋषयः॥ श्रीरग्निर्देवता आद्यास्तिस्रोऽनुष्टुप्
[illegible] कांसोस्मितेति बृहती उत्तरयोस्त्रिष्टुप्॥ अष्टावनुष्टुभो अंत्याः प्रस्तारपंक्तिः
यज्जाग्रत इत्याद्याः शिवसंकल्पाख्याश्च मंत्राः परशाखीयाः॥ विहि होत्रेति पंच
र्चस्य सूक्तस्य वामदेवो गोतमो वायुरनुष्टुप्॥ मुंचामि त्वेति पंचर्चस्य सूक्तस्य प्रा
जापत्यो यक्ष्मनाशन इंद्रस्त्रिष्टुप्॥ अंत्यानुष्टुप्॥ स्योना पृथिवीति मेधातिथि

॥प्र०र० म्र मिर्गा यत्री॥ द्रविणोदा आंगिरसः कुत्सो द्रविणोदा अग्निस्त्रिष्टुप्॥ सविता प
॥३२॥ श्यातान्द्वानाको वृशो विश्वेदेवा जगती॥ नवो नवो भवति जायमानो निसूर्यासा
वित्री चंद्रमा स्त्रिष्टुप्॥ विद्युन्नयापतंती पुरूरवा उर्वशी त्रिष्टुप्॥ उलूकयातुं वसि
ष्ट इंद्र स्त्रिष्टुप्॥ पिशंगभृष्टिमंदेवोदासिः पुरुहूपइंद्रो गायत्री॥ एतैः सर्वैर्मंत्रैः
सूत्रमभिविच्य॥ जातवेदसे मारीचकश्यपो जातवेदा अग्निस्त्रिष्टुप्॥ अनेन मंत्रे
ण गंधेन सूत्रं विलिप्य॥ विश्वेतातेभार्गवा न्यम इंद्रो जगती॥ अनेन पुंसो दक्षि
णहस्ते बध्नीयात्॥ श्रीये जातः कण्वः पवमानसोमं स्त्रिष्टुप्॥ अनेन स्त्रिया ॥रा०म०॥
॥३२॥

वामहस्ते बध्नीयात्॥ ततो आचार्यो ऋत्विजश्च यजमानस्य मंत्रै रक्षां कुर्युः॥ ग
ते च मंत्राः॥ शंनेजीवेति हृयोः प्राजापत्यो यक्ष्मनाशन इंद्र स्त्रिष्टुप्॥ अंत्यानुष्टु
प्॥ ययत्ते नेत्यृष्टस्तृ चस्य सूक्तस्य मानवो नाभानेदिष्ठो विश्वेदेवा आद्याश्चत
स्रो जगत्यः पंचम्यष्टुप्॥ षष्ठि बृहती सप्तमी सतो बृहती अष्टम्यनुष्टुप्॥ त्र्यं
बकं वसिष्ठो रुद्रोनुष्टुप्॥ एतैर्मंत्रै रक्षायां कृतायां यजमानः कृतकर्म साद्गु
ण्यार्थमाचार्याय ऋत्विग्भ्यश्च यथाशक्ति दक्षिणां दद्यात्॥ अन्येभ्योपि भू
यसीं दद्यादिति॥ ॥इति श्रीम[redacted] सूरिसूनु नारायणभट्टकृ

॥प्र०र०॥ तेप्रयोगरत्ने कौतुकबंधप्रयोगः ॥ अथग्रहयज्ञाः ॥ ॥ सचनित्यनैमित्तिका
॥३३॥ काम्यभेदेनत्रेधा ॥ अयनविषुवोपरागादिषुनित्यः ॥ गर्भाधानादिकर्मप्रारं
भेषुनैमित्तिकः ॥ विपदपगमसंपदादिकामानांतुकाम्यः ॥ अत्रमुख्यान्याके
ताज्ञेयानि ॥ ग्रहरूपादिज्ञात्वाकर्मकार्यं अन्यथाविफलं ॥ तदाहाश्वलायनः
चार्यः ॥ रूपवर्णायुधस्थानमंडलासनवाहनात् ॥ समित्कुंडापहारांश्चयुध्यं
रत्नाकृतीरपि ॥ गायत्रीमूलमंत्रांश्चनाममंत्रांश्चकेवलान् ॥ अधिप्रत्यधिदे ॥रम०॥
वानांमंत्रांश्चर्ष्यादिसंयुतान् ॥ तत्रमूर्त्तीश्चजानीयाद्वौधयन्नर्चयन्नवग्रहान् ॥३३॥

अज्ञात्वैवयुमानिष्टात्तत्फलंनैवविंदति ॥ दुःखंचाप्नोतिसुमहाद्यत्नादिष्टा
ध्यवितुमानितिगायत्री ग्रहगायत्रीप्रयोगेवक्ष्यते ॥ वर्णादयश्चमंडपकुंडादि
चकाम्ययथोक्तंकार्यं ॥ नित्यनैमित्तिकयोस्तुनित्यं ॥ नित्यनैमित्तिकेहिस्ता
सर्वमन्यत्तुमंडपमितमत्स्योक्तेः ॥ कुंडेवास्थंडिलेपिचेतिआचार्योक्तेश्च ॥
मंडपलक्षणंहेमाद्रौमत्स्यपुराणे ॥ गृहस्योत्तरपूर्वेणमंडपंकारयेद्बुधः ॥ रु
द्रायतनभूमौवाचतुरस्रमुदक्प्लवं ॥ दशहस्तानथाष्टौवाहस्तान्कुर्याद्विधा
नेनः ॥ तस्यद्वाराणिचत्वारिकर्त्तव्यानिविचक्षणैः ॥ कुंडंचस्कंदपुराणे ॥

॥प्र०र०॥ नवग्रहमखे कुंडं हस्तमात्रं समंततः॥ चतुरस्रमधोहस्तं योनिवक्त्रं समेख
॥३४॥ लं॥ चतुरंगुलविस्तारा मेखलात्र ततदुच्छ्रिता॥ मात्स्ये॥ वितस्तिमात्रा योनिः स्या
त्षट्सप्तांगुलविस्तृता॥ कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता॥ गजोष्ठ
सदृशी तद्वदायता नाछिद्रसंयुता॥ मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा॥ ग
जोष्ठतुल्याश्वत्थदलतुल्या वेति विकल्पः॥ सा च योनिः पश्चिमतः कार्या॥ पश्चि
मतमेमध्यभागे तु योनिं कुर्याद्द्विधानतः इति गर्गोक्तेः॥ मात्स्ये॥ मानहीना ॥ग्र०॥
धिकं कुंडमनेकभयदं भवेत्॥ तस्य चोत्तरपूर्वे तु स्थंडिलं हस्तमात्रकं॥ त्रि ॥३४॥

वप्रं चतुरस्रं च वितस्त्युच्छ्रायसंमितं॥ स्थंडिले वेदिः॥ वप्रमेखलादिरंगुलेनोच्छ्रि
तो वप्रप्रथमस्तु मुदाहृतः॥ अंगुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि॥ द्व्यंगुलस्त
त्र विस्तारः सर्वेषां कथितो बुधैरिति॥ अन्यत्सर्वं दर्शदेशकालनामादि॥ प्रयोगेस्प
ष्टीभविष्यति॥ ॥अथ ग्रहयज्ञप्रयोगः॥ यजमानस्त्रोता नित्यकर्म निर्वर्त्य मु
हूर्त्रिकोक्ते काले देशकालौ संकीर्त्य अयनादिभिस्य कालेषु संकल्पयेत्॥ ग्र
हानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति संकल्प्य॥ गणा
धोनादिनिमित्तेषु अमुककर्माकर्तुं माशौचादिनादि ग्रहानुकूल्यद्वारा सिद्धि

॥ग्र०र०॥ द्वाराश्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये इति संकल्प्य ॥ विपद्दयगामाद्भिका
॥३५॥ मनायां तु अमुककामनासिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये इति सं
कल्प्य ॥ ततः संभारान् संभवेत् ॥ तत्र नित्यनैमित्तिकयोः प्रतिपदोक्तवस्तूनि मद
भावे तु कल्परूपाणि वा यथाशक्ति संपादयेत् ॥ काम्ये तु प्रतिनिध्याभावात् ॥ प्र
तिपदोक्तवस्तून्येव ॥ तत्र आचार्यादिवर्णं तत्र विद्धिं स्वशाखाविदं साचारमे
कं अस्मिन् ग्रहमखे त्वमाचार्यः कर्दिति पाणिना पाणिं मुषस्पृश्य वृणुयात् ॥
आचार्यस्तु यथा स्वर्गे शक्रादीनां पितामहः ॥ तथा त्वं मम यज्ञेस्मिन् आचा ॥ग्रम०॥ ॥३५॥

र्यो भव सुव्रत ॥ इति मंत्रेण वृत्वा ॥ यथाशक्त्युपचारैर्मधुपर्कादिना वरेत ॥
ततो ब्राह्मणं ॥ यथा चतुर्मुखो ब्रह्मा शक्रादीनां पितामहः ॥ तथा त्वं मम यज्ञेस्मि
न् ब्रह्मा भव सुव्रतः ॥ इति ब्राह्मणं पूर्ववत् अर्चयेत् ॥ अन्यानार्त्विजं कुर्वि
ति प्रत्येकं वृणुयात् ॥ ते च होमानुसारेण चत्वारः अष्टौ षोडश वा ॥ ते च करिष्या
मि स्वस्त्याचमेयुः ॥ ततो यजमानः स्वस्त्यायाशन्त्याचर्ययेत् ॥ ततः आचार्यः कर्म
संकल्पपूर्वकं गृहाद् उत्तरतः ऐशान्ये वा हस्तानां चतुर्विंशहस्तमात्रां वरयां च तु स्त्रि
सहस्रांगुलप्रमाणां त्रिभूमिकां यां ग्रहवेद्यां शुक्लो त्रीहितंदुलैः सकर्णिकमष्टदलं

॥प्र०र० मंबुजमुद्रिस्थकर्णिकायांदलेषुचवर्तुलादिग्रहपीठानितत्तद्वर्णकाक्षत
॥३६॥ तैर्यथोपपन्नैर्वाकुर्यात्तत्रानीलं॥मध्यरक्ताक्षतैर्वर्तुलं॥आग्नेयदलेशुक्ला
क्षतैश्चतुरस्रं॥दक्षिणदलेरक्ताक्षतैस्त्रिकोणं॥ईशानदलेहरिताक्षतैर्बा
णाकारंउत्तरदलेहरिताक्षतैर्दीर्घचतुरस्रं॥पूर्वदलेशुक्लाक्षतैःपंचकोणं
पश्चिमदलेकृष्णाक्षतैश्चापाकारं॥नैरृतिदलेकृष्णाक्षतैःशूर्पाकारं॥वा
यव्यदलेचित्राक्षतैर्ध्वजाकारमिति॥ततउदीच्यांरंगवल्लीकारंजितप९ ॥रा०म०॥
द्मोपरिघृतधान्योपीठेनवमअव्रणमकालकंतैजसंमृन्मयंवाकुंभम ॥३६॥
ग

भिषेककुंभंनिधाय॥इमंमेगंगेइत्यस्यसिंधुक्षितऋषिःमेधोनदीस्तुतिर्जग
ती॥इमंमेगंगेयमुनेसरस्वतीशुतुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्यामरु
द्वृधेवितस्तयार्जिकीयेशृणुह्यासुषोमया॥अनेनमंत्रेणजलेनपूरयित्वा॥सूत्रे
णावस्त्रयुग्मेनवावेष्ट्य॥हयगजवल्मीकहृदगोष्ठराजद्वारचतुष्पथमृदः
उद्धृतासिवराहेणकृष्णेनशतबाहुना॥मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृ
तं॥इतिकुंभेनिक्षिप्य॥रुवतिभीमइत्यस्यवैश्वामित्रोरेणुःपवमानसो
मोजगती॥अन्ययन्त्यगाधन्विल्छलक्षतंबुच्छुनटक्षत्वचः॥रुवतिभी

॥प्र०र०॥ मो वृषभस्य विष्यया शृंगे शिशानो हरिणी विचक्षणः॥ अयोनिं सोमः सु
कृतं निषीदति गव्ययी त्वग्भवति निर्णिगव्ययी॥ प्रवो यज्ञेष्वित्यस्य वसिष्ठो
॥३७॥ विश्वेदेवा त्रिष्टुप्॥ अनेन तेषां पृश्निवानानि क्षिप्य॥ प्रवो यज्ञेषु देवयंतो
अर्चिद्या वा नमोभिः पृथिवी इषध्ये॥ येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियं
ति वनिनो न शाखा॥ गायत्र्या प्रथितो विश्वामित्रः सविता गायत्री॥ अनेन गोमूत्रं
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ गंधद्वारेत ॥राम०॥
स्यानंदः श्रीरनुष्टुप्॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभू ॥३८॥

तानां तामिहोपह्वये श्रियं॥ अनेन गोमयं॥ आप्यायस्व समेतु त इत्यस्य राहूग
णो गोतमः सोमो गायत्री॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं॥ भवा वा
जस्य संगथे॥ अनेन गोक्षीरं॥ दधिक्राव्ण इत्यस्य गोतमो वामदेवो दधिक्रावा
नुष्टुप्॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः॥ सुरभि नो मुखा करत्
प्रण आयूंषि तारिषत्॥ अनेन दधि॥ शुक्रमसि ज्योतिरसि देवो वः सवितोत्पु
नात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः॥ घृतं॥ कुशोदकं देवस्य त्वेत्य
नेन मंत्रेण पंचामृतानि प्रसिद्धमंत्रैः॥ सहिरण्यानि अस्याश्या वाम्बः सवीता

॥प्र०र०॥ गायत्री॥ स हिरण्यानि दाशुषे सुवाति सविता भगः तं भागं चित्रमीमहे॥ अग्ने
॥३८॥ नय वरुणानि या ओषधीरित्यस्याथर्वणो भिषग्वधया नुष्टुप्॥ या ओषधीः
पूर्वा जाता देवेभ्यस्त्रियुगं पुरा॥ मनैनु बभ्रूणामहं शतं धामानि सप्त च॥ यत्कान्
काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः स्परि॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन
च॥ दूर्वाः॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः॥ बृहस्पतिप्रसूतास्तानो
मुंचत्वंहसः॥ फलं॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभू ॥राम०॥
तानां तामिहोपह्वये श्रियं॥ गंधं निक्षिप्य॥ पूर्णा दर्वि परापत सुपूर्णा पुन ॥३८॥

रापत॥ वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो॥ पूर्णपात्रं॥ सर्वे समुद्राः
सरितास्तीर्थानि जलदा नदाः॥ आयांतु मम शांत्यर्थं दुरितक्षयकारकाः॥ गं
गे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे सिंधु कावेरी जलेस्मिन्संनिधिं कु
रु॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या॥ असिक्न्या म
रुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥ सितासिते सरिते यत्र संगते तत्रा
प्लुतासो दिवमुत्पतंति॥ ये वै तन्वं विसृजंति धीरास्ते जनासो अमृतत्वं भजंते
॥ आपो हि ष्ठेति नवर्चस्य सूक्तस्य॥ अंबरीष सिंधुद्वीप आपो गायत्री॥

॥प्र०१०॥ पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंत्येष्टि अनुष्टुभो ॥ आपो हिष्ठा मयोभुवस्ता
॥३९॥ न ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ यो वः शिवतमो रसः तस्य भाजयतेह नः ॥ उ
शतीरिव मातरः ॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च
नः ॥ शन्नो देवीरभिष्टय आपो भवंतु पीतये ॥ शंयोरभिस्रवंतु नः ॥ ईशाना वार्याणां
क्षयंतीश्चर्षणीनां ॥ आपो याचामि भेषजं ॥ अप्सु मे सोमो अब्रवीदंतर्विश्वानि
भेषजा ॥ अग्निं च विश्वशंभुवं ॥ आपः पृणीत भेषजं वरूथं तन्वे३ मम ज्योक्चसू ॥राम०॥
र्यंदृशे ॥ इदमापः प्रवहत यत्किंच दुरितं मयि ॥ यद्वाहमभिदुद्रोह यद्वा शेप उता ॥३९॥

नृतं ॥ आपो अद्यान्वचारिषं रसेन समगस्महि ॥ पयस्वानग्न आगहि तं मा संसृज
वर्चसा ॥ आनेन सूक्तेन ॥ नहि ते क्षत्रं भित्याद्येकविंशत्यृचा माजीगर्तिः शुनः
शेपो वरुण आद्या दश त्रिष्टुभः ॥ शिष्टा गायत्री ॥ नहि ते क्षत्रं न सहो न मन्युं
वयश्चनामी पतयंत आपुः ॥ नेमा आपो अनिमिषं चरंतीर्न ये वातस्य प्रमिनं
त्यभ्वं ॥ अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ॥ नीचीनाः स्थुरुप
रि बुध्न एषामस्मे अंतर्निहिताः केतवः स्युः ॥ उरुं हि राजा वरुणश्चकार सूर्याय पं
थामन्वेतवा उ ॥ अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ शतं

॥प्र०२०॥ तेरान्भिषजःसहस्रमुर्वीगभीरासुमतिष्टेअस्तु॥बाधस्वदूरेनिर्ऋतिंपराचैः
कृतंचिदेनःप्रमुमुग्ध्यस्मात्॥अमीयऋक्षानिहितासउच्चानक्तंददृश्रेकुहचि
॥४०॥ द्दिवेयुः॥अदब्धानिवरुणस्यव्रतानिविचाकशच्चंद्रमानक्तमेति॥१॥तत्त्वा
यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अहेळमानोवरुणेह
बोध्युरुशंसमानआयुःप्रमोषीः॥तदिन्नक्तंतद्दिवामह्यमाहुस्तदयंकेतोहृद
आविचष्टे॥शुनःशेपोयमह्वद्गृभीतःसोअस्मान्राजावरुणोमुमोक्तु॥शुनःशे ॥राम०॥
पोह्यह्वद्गृभीतस्त्रिष्वादित्यंद्रुपदेषुबद्धः॥अवैनंराजावरुणःससृज्याद्विद्वाँ ॥४०॥

अदब्धोविमुमोक्तुपाशान्॥अवतेहेळोवरुणनमोभिरवयज्ञेभिरीमहेहवि
र्भिः॥क्षयंनस्मभ्यमसुरप्रचेताराजन्नेनोंशिश्रथःकृतानि॥उदुत्तमंवरुणपाश
मस्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोदितयेस्या
म॥२॥यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं॥मिनीमसिद्यविद्यवि॥मानोवधा
यहत्नवेजिहीळानस्यरीरधः॥माहृणानस्यमन्यवे॥विमृळीकायतेमनोरथीरश्वं
नसंदितं॥गीर्भिर्वरुणसीमहि॥पराहिमेविमन्यवःपतंतिवस्यइष्टये॥वयोवन
सतीरुप॥कदाक्षत्रश्रियंनरमावरुणंकरामहे॥मृळीकायोरुचक्षसं॥३॥

॥ प्र०र० ॥ त्रिमा नमाशाश्वे वेनंतानप्रयुंछतः ॥ धृतव्रताय दाशुषे ॥ वेदा यो वीनां पदमंत
रिक्षेण पततां ॥ वेद नावः समुद्रियः ॥ वेद मासो धृतव्रतो द्वादश प्रजावतः ॥ वेदा
॥ ४२ ॥ य उपजायते ॥ वेद वातस्य वर्त्तनिमुरोर्ऋष्वस्य बृहतः ॥ वेदा ये अध्यासते ॥ नि षसा
द धृतव्रतो वरुणः पस्त्या३स्वा ॥ साम्राज्याय सुक्रतुः ॥ ५ ॥ अतो विश्वान्यद्भुता
चिकित्वां अभि पश्यति ॥ कृतानि या च कर्त्वा ॥ अभिमंत्रयेत् ॥ स्वादिष्ठयेति
दशार्चस्य सूक्तस्य मधुच्छंदाः पवमान सोमो गायत्री ॥ अनेन सूक्तेन च कुंभमभि ॥ राम० ॥
मंत्रयेत् ॥ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ॥ इंद्राय पातवे सुतः ॥ ॥ ४१ ॥

रक्षोहा विश्वचर्षणिरभि योनिमयोहतं ॥ द्रुणा सधस्थमासदत् ॥ वरिवो
धातमो भव मंहिष्ठो वृत्रहंतमः ॥ पर्षि राधो मघोनां ॥ अभ्यर्ष महानां देवानां
वीतिमंधसा ॥ अभि वाजमुत श्रवः ॥ त्वामच्छा चरामसि तदिदर्थं दिवेदिवे ॥
इंदो त्वे न आशसः ॥ २ ॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता ॥ वारेण श
श्वता तना ॥ तमीमण्वीः समर्य आ गृभ्णंति योषणो दश ॥ स्वसारः पार्ये दि
वि ॥ तमीं हिन्वंत्यग्रुवो धमंति बाकुरं दृतिं ॥ त्रिधातु वारणं मधु ॥ अभी३मम
घ्न्या उत श्रीणंति धेनवः शिशुं ॥ सोममिंद्राय पातवे ॥ अस्येदिंद्रो मदेष्वा विश्वा

॥प्र०र०॥ वत्राणि जिघ्रते ॥ शुरोमघ्राचमं हते ॥ अनेन तं कुंभमभिमंत्रयेत् ॥ कलशस्य मु
खे विष्णुरिति देवतानवमं वा इत्यादिकलशाभिमंत्रणं ॥ यद्वा कलशाभिमंत्र
॥४२॥ णाऽन्यं मंत्रविदं प्रयुंजीत ॥ ततः कर्म संकल्प्य विधिवत्स्वस्तिवाचनं कृत्वा ग्रहवेदी
पश्चपीठ यथास्थानं यथामुखी ग्रहप्रतिमास्थापयित्वा ॥ दक्षिणवामपार्श्वयो
रधिदेवताप्रत्यधिदेवतानां तदभिमुख्यो स्थापयेत् ॥ तदभावे पुष्पाक्षतादिषा
वाहयेत् ॥ तत्रायं प्रकारः ॥ व्यस्तसमस्तव्याहृतीनां अत्रिभृगुभरद्वाजप्रजापत ॥राम०॥
य ऋषयः अग्निवायुः अग्निवायुः सूर्यप्रजापतिर्देवतागायत्र्युष्णिगनुष्टुप् बृ ॥४२॥

हत्यः छंदांसि ॥ ॐ भूरादित्यमावाहयामि ॥ ॐ भुवरादित्यमावाहयामि ॥ ॐ
स्वरादित्यमावाहयामि ॥ ॐ भूर्भुवः स्वरादित्यमावाहयामि ॥ आकृष्णेनेत्यस्य
हिरण्यस्तूपः सविता त्रिष्टुप् ॥ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं म
र्त्यं च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ आकृष्णेनेत्यस्य
मुच्चार्य ॥ भगवन्नादित्य ग्रहाधिपते काश्यपगोत्र कलिंगदेशोद्भव रजपापुष्पा ऽ
पभांगधृते द्विभुज पद्माभयहस्त सिंदूरवर्णां बरमाल्यानुलेपन ज्वलन्माणि
क्यखचित सर्वांगाभरण भास्कर तेजोनिधे त्रिलोकप्रकाश त्रिदेवतामयप्र

॥ग्र०र०॥ नेनमस्तेसत्रह्मारुणध्वजपताकोपशोभितेनसप्ताश्वरथवाहनेनमेरुंप्रदक्षि
॥४३॥ णीकुर्वन्नागच्छाश्विरुद्राभ्यांसहपद्मकर्णिकायांताम्रप्रतिमांप्राङ्मुखींवर्तुलपी
ठेधितिष्ठसूर्यत्वामावाहयामि॥ इत्यादित्यमावाहयेत्॥ दक्षिणपार्श्वे॥ ॐभू
रादित्याधिदेवमग्निमावाहयामि॥ ॐभुवरादित्याधिदेवमग्निमावाहयामि
ॐस्वरादित्याधिदेवमग्निमावाहयामि॥ ॐभूर्भुवःस्वरादित्याधिदेवमग्निमा
वाहयामि॥ अग्निंदूतमित्यस्यकाण्ववामेधातिथिऋषिर्गायत्री॥ इमंमंत्रमुच्चार्य॥ ॥राम०॥
अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥ अस्ययज्ञस्यसुक्रतुं॥ पिंगभ्रूश्मश्रुकेशं ॥४३॥

पिंगाक्षंत्रिनयनंअरुणवर्णंछागस्थंसाक्षसूत्रंसप्तार्चिषंशक्तिधरवदहस्तद्व
यंआदित्याधिदेवमग्निमावाहयामि॥ तद्वामपार्श्वे॥ ॐभूरादित्यप्रत्यधिदेवंरु
द्रमावाहयामि॥ ॐभुवरादित्यप्रत्यधिदेवंरुद्रमावाहयामि॥ ॐस्वरादित्यप्रत्य
धिदेवंरुद्रमावाहयामि॥ ॐभूर्भुवःस्वःरादित्याप्रत्यधिदेवंरुद्रमावाहयामि
॥त्र्यंबकमित्यस्यवसिष्ठस्त्र्यंबकोनुष्टुप्॥ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं
उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥ इमंमंत्रमुच्चार्यत्रिलोचनंपंचव
क्त्रंवृषभारूढंकपालशूलंखट्वांगधारिणंचंद्रमौलिंसदाशिवमादित्यप्रत्यधि

॥प्र०र०॥ देवं रुद्रमावाहयामि तद्दक्षिणपूर्वदले ॥ ॐ भूः सोममावाहयामि ॥ ॐ भुवः सो
॥४४॥ ममावाहयामि ॥ ॐ स्वः सोममावाहयामि ॥ ॐ भूर्भुवः स्वः सोममावाहयामि ॥
आप्यायस्वेत्यस्य गोतमः सोमो गायत्री ॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं
भवा वाजस्य संगथे ॥ इमं मंत्रमुच्चार्य ॥ भगवन्सोम द्विजाधिपतये सुधामय शरी
रात्रेयगोत्र यमुनादेशेश्वर गोक्षीरधवलांगकांते द्विभुज गदावरदहस्तांकितक
रमुक्ताबरमाल्यानुलेपनसर्वांगामुक्ताभौक्तिकाभरणरमणीयसमस्तलोका ॥एम०॥
प्यायकदेवतास्वद्यमूर्त्ते नमस्ते संनद्धधवलध्वजपताकोपशोभितेन द ॥४४॥

शश्वेताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ द्विरुमया सह पश्चाग्नेयद
लमध्ये स्फटिकप्रतिमा प्रत्यङ्मुखी चतुरस्रपिठे धिनिष्ठ पूजार्थं त्वामावाहया
मि तद्दक्षिणपार्श्वे पूर्ववत् ॥ व्यस्तसमस्तव्याहृत्युच्चारणानंतरं ॥ अप्सुमेसु
म इत्यस्य सिंधुद्वीप ऋषिर्गायत्री ॥ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा
अग्निंच विश्वशंभुवं ॥ इमं मंत्रमुच्चार्य ॥ स्त्रीरूपधारिणी श्वेतवर्णा मकरवाहनाः
पाशांकुशधारिणी मुक्ताभरणभूषिताः ॥ सोमाधिदेवताः अपश्चावाहया
मि ॥ वामपार्श्वे व्यस्तसमस्तव्याहृत्युच्चारणानंतरं गौरीर्मिमायेत्यस्य दीर्घत

॥प्र०र०॥ मा उक्षा जगती॥ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
॥४५॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥ इमं मंत्रमुच्चार्य अ
क्षसूत्रकमलदर्पणकमंडलुधारिणीं त्रिदशपूजितां सोमस्याधिदेवताम
मामावाहयामि॥ अथ दक्षिणदले पूर्ववत् व्याहृत्युच्चारणानंतरं॥ अग्निर्मू
र्धेत्यस्य विरूपांगारको गायत्री अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं
अपां रेतांसि जिन्वति॥ इमं मंत्रमुच्चार्य॥ भगवन्नंगारकं म्याह्नेभास्करद्याजस ॥एम०॥
गोत्रावंतिदेशेश्वरं बालाभ्रं जोपमांगच्युते चतुर्भुजं शक्तिशूलगदावरदां ॥४५॥

गधारिणं रक्तांबरमाल्यानुलेपनप्रवालाभरणभूषितसर्वांगं दुरालोकदीप्ते
न मस्ते सन्नद्धरक्तध्वजपताकाशोभितेन रक्तमेषरथवाहनेन मेरुं प्रदक्षिणी
कुर्वंतमागच्छ भूमिस्कंदाभ्यां सह पद्मदक्षिणदलमध्ये रक्तचंदनप्रतिमां दक्षिणा
भिमुखीं त्रिकोणपीठे स्थितिं पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे व्याहृत्यु
च्चारणानंतरं स्योना पृथिवीत्यस्य मेधातिथिः पृथिवी गायत्री॥ स्योना पृथिवी
भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथः॥ इमं मंत्रमुच्चार्य॥ शुक्लवर्णां दिव्या
भरणभूषितां चतुर्भुजां सौम्यवपुषं चंद्रांशुसदृशीं वरां रत्नपात्रसस्यपात्रौ

॥ग्र०र०॥ षधियात्रपञ्चोपेतकरां चतुर्दिङ्भागदक्षिणगतां अंगारकाधिदेवतां भूमिमावाह
यामि॥ तद्वामपार्श्वे व्याहृत्युच्चारणानंतरं॥ कुमारश्चित्पितरमित्यस्य गृत्समद
॥४६॥ स्कंदऋषिस्त्रिष्टुप्॥ कुमारश्चित्पितरं वंदमानं प्रतिनानाम रुद्रोपयंतं भूरेर्दातारं सत्प
तिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे॥ इमं मंत्रमुच्चार्य॥ षण्मुखं शक्तिखड्गकविभू
षणांगं रक्ताम्बरधरं मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतं चतुर्भुजं मंगरक
प्रत्यधिदेवतां स्कंदमावाहयामि॥ ततः प्रागुत्तरदले पूर्ववत् व्याहृत्युच्चारण ॥रा०म०॥
नंतरं॥ उद्बुध्यध्वमित्यस्य बुद्धः सौम्यस्त्रिष्टुप्॥ उद्बुध्यध्वं समनसः सखायः सम ॥४६॥

ग्निमिंध्वं बहवः सनीळाः॥ दधिक्रामग्निमुषसं च देवीमिंद्रावतोवसे निह्वये
वः॥ इमं मंत्रमुच्चार्य॥ भगवन्सौम्य सौम्याकृते सर्वज्ञानमयात्रिगोत्र मगधदे
शेश्वरकुंकुमवर्णांगद्युते चतुर्भुज खड्गखेटकगदावरदानांकितपीतांबरा
माल्यानुलेपन मरकताभरणालंकृतसर्वांग विबुधमतेन मखे सन्नद्धपीत
ध्वजपताकोपशोभितेन चतुःसिंहरथवाहनेन मेरुं प्रदक्षिणीकुर्वन् सत्वगुण
क्ष विष्णुरुषाभ्यां सह पूर्वेशानदले मध्ये सुवर्णप्रतिमासु दक्षमुखीं बाणाकृ
रपीठे अधिनिष्ठन्नार्थं त्वामावाहयामि॥ अधिदेवतयोरावाहनं॥ व्याहृति

॥प्र०र०॥ हक्का॥ इदं विष्णुरिति काण्वो मेधातिथिर्विष्णुर्गायत्री॥ इदं विष्णुर्विचक्रमे
त्रेधा निदधे पदं समूढमस्य पांसुरे॥ सहस्रशीर्षेत्यस्य नारायण ऋषिः पुरुषो नुष्टुप्॥
॥४७॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वात्यतिष्ठद्द
शांगुलं॥ इमं मंत्रमनुच्चार्य॥ कौमोदकीपद्मशंखचक्रोपेतं चतुर्भुजं सौम्य
धिदेवतां विष्णुमावाहयामि॥ प्रत्यधिदेवतां पुरुषमावाहयामि॥ उत्तरदले बृ
ववतं॥ आदित्यस्योत्तरेणोत्तरं॥ बृहस्पतेत्र्यनीत्यस्य गृत्समदो बृहस्पतिस्त्रिष्टुप्॥ ॥ग्र०॥
बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु॥ यद्दीदयच्छवसर्त ॥४७॥

तप्रजात तदस्मासु द्रविणं धेहि चित्रं॥ इमं मंत्रमनुच्चार्य॥ भगवन् बृहस्पते
समस्तदेवताचार्यांगिरसगोत्र सिंधुदेशेश्वर इह सुवर्णांग घृतेचतुर्भु
ज दंडकमंडल्वाक्षसूत्र वरदानांकित पीतांबर माल्यानुलेपन पुष्परागभू
षाभरणीय समस्तविद्याधिपते नमस्ते सन्नद्धपीतध्वजपताकोपशोभिते
तपीतांबरयवाकृतेन मेरुं प्रदक्षिणीकुर्वन्नागच्छेंद्र ब्रह्माभ्यां सह पद्मोत्त
रदलमध्ये सुवर्णप्रतिमामुदङ्मुखीं दीर्घचतुरस्रपीठे ऽधितिष्ठ पूजार्थं त्वा
मावाहयामि॥ तद्दक्षिणपार्श्वे आदित्योत्तरेणानंतरं इंद्र श्रेष्ठानीत्यस्य गृ

॥प्र०र०॥ त्समदो इंद्रस्त्रिष्टुप् ॥ इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां ॥ इमं मंत्रमुच्चार्य ॥
॥४८॥ चतुर्दंतगजारूढं वज्रांकुशधरं शचीपतिं नानाभरणभूषितं ॥ बृहस्पत्यधि
देवतां इंद्रमावाहयामि ॥ तद्वामपार्श्वे व्याहृत्युच्चारणानंतरं ॥ ब्रह्मणा ते ब्रह्म
युजेत्यस्य विश्वामित्रो ब्रह्मा त्रिष्टुप् ॥ ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखा
या सधमाद आशू ॥ स्थिरं रथं सुखमिंद्राधितिष्ठन्प्रजानन्विद्वां उप याहि सोमं ॥र०म०॥
इमं मंत्रमुच्चार्य ॥ पद्मासनरूढं [illegible] जटिलं चतुर्मुखमक्षमालास्रुक्स्रुवपुस्तक ॥४८॥

कमंडलुधारिणं कृष्णाजिनवाससं पार्श्वस्थितहंसं बृहस्पतिप्रत्यधिदेवतां
ब्रह्माणमावाहयामि ॥ प्राग्दलपूर्वविद्याहृत्युच्चारणानंतरं ॥ शुक्रं ते अन्यदि
त्यस्य भरद्वाज शुक्रस्त्रिष्टुप् ॥ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौ
रिवासि ॥ विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥ इमं मंत्र
मुच्चार्य ॥ भगवन्भार्गव समस्तदैत्यगुरो भार्गवगोत्र भोजकटदेशोद्भव रजतोज्व
लांग कांते चतुर्भुज दंडकमंडल्वक्षसूत्र वरदानांकित शुक्लांबरमाल्यानुले
पन वस्त्राभरणभूषित सर्वांग समस्त नीतिशास्त्र निपुण एणमतेन मस्ते संनद्धस्तु

॥प्र०र० कृष्णध्वजपताकोपशोभिते शुक्लाश्वरथवाहनेन मेरुं प्रदक्षिणी कुर्वन्नागच्छेंद्रा
णी इंद्राण्यां सह पश्चिमपूर्वबलमध्ये रजतप्रतिमां प्रांशुरवीं पंचकोणपीठेधिति
॥४९॥ ष्ठ पूजार्थं त्वामावाहयामि नदक्षिणपार्श्वे पूर्ववत् व्याहृत्युच्चारणानंतरं ॥ इं
द्राणीमासिवित्यस्य वृषाकपिरिंद्राणी पंक्तिः ॥ इंद्राणीमासु नारिषु सुभगामह
मश्रवं ॥ नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः ॥ इमं मंत्रमुच्चा
र्य ॥ संतानमंजरिवरदा धनद हिसुजांभुक्ताधिदेवतां इंद्राणीमावाहयामि ॥राम ॥
मि ॥ वामपार्श्वे पूर्ववद्व्याहृत्युच्चारणानंतरं ॥ इंद्रमिद्देवतातयइत्यस्य मेधा ॥४९॥

तिथिः रिंद्रः प्रगाथो बृहती ॥ इंद्रमिद्देवतातय इंद्रं प्रयत्यध्वरे ॥ इंद्रं समीके
वनिनो हवामह इंद्रं धनस्य सातये ॥ इमं मंत्रमुच्चार्य ॥ चतुर्दंतगजारूढं वज्रां
कुशाध्वरं शचीपतिं नानाभरणभूषितं भाः स्वि प्रत्यधिदेवता इंद्रमावाहया
मि ॥ पश्चिममंडले पूर्ववद्व्याहृत्युच्चारणानंतरं ॥ शमग्निरिरिंपिठिः शनैश्चर उ
ष्णिक् ॥ शमग्निरग्निभिः करच्छंनस्तपतु सूर्यः ॥ शंवातो वात्वरपा अपस्त्रिधः ॥
इमं मंत्रमुच्चार्य भगवन् शनैश्वर भास्करतनय कश्यपसगोत्र सुराष्ट्रदेशोद्भ
रक ज्जलनीलांशकांते चतुर्भुजा चारूणीर कृपाणाभयांकितभिलांबरमा

॥प्र० र०॥ स्यानुलेपननीलरत्नभूषणालंकृतसर्वांगसमस्तभूषणभीषणाम ध्येमूर्त्तेनम
स्तेसंनद्धनीलध्वजपताकोपशोभितेननीलशृध्रुरथवाहनेनमेरुप्रदक्षिणीकुर्व
॥ ५०॥ णाग्रप्रजापतियमाभ्यां सह पद्म पश्चिमदलमध्ये कालातपस प्रतिमां प्रत्यङ्मुखी
चापाकारपीठे धितिष्ठ प्रजार्थे त्वामावाहयामि ॥ तद्दक्षिणपार्श्वे पूर्ववद्याहृत्य
नंतरं प्रजापतये येन त्वदिस्य हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ प्रजापते न त्वदेतान्य
न्यो विश्वा जातानि परिता बभूव ॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पत ॥राम०॥
यो रयीणां ॥ इमं मंत्रमुच्चार्य ॥ यज्ञोपवीतिनं हे सरख मेक वक्रं अक्षमालास्रुव ॥५०॥

पुस्तककमंडलुसहितचतुर्भुजं शनैश्चराधिदेवतां प्रजापतिमावाहयामि
वामपार्श्वे व्याहृत्यानंतरं यमाय सोमं सुनुत त्वस्य यमो नुष्टुप् ॥ यमाय सोमं सु
नुत यमाय जुहुता हविः ॥ यमं यज्ञो ह गच्छत्यग्निदूतो अरंकृतः ॥ इमं मंत्रमुच्चा
र्य ॥ इषत्पीनं दंष्ट्रं रक्तदृशं पाशोधरं कृष्णवर्णं महिषारूढं सर्वाभरणभू
षितं शनैश्चरप्रत्यधिदेवतां यममावाहयामि प्रस्य दक्षिणदले ग्रे पूर्ववद्याहृ
त्युच्चारणानंतरं ॥ कयानश्चित्र इत्यस्य वामदेवो ऋषिः गायत्री ॥ कयानश्चित्र आ
भुवदूती सदावृधः सखा कया सचिष्ठया वृता ॥ इमं मंत्रमुच्चार्य ॥ भगवन् राहो

॥प्र०र० रविसोममर्दनसिंहिकानंदपैठीनसगोत्रबर्बरदेशेश्वरकालमेघच्छवे॥व्या
॥५९॥ घ्रवदनचतुर्भुजखड्गचर्मशूलवरदान्वितकृष्णांबरमाल्यानुलेपनगोमेधि
काभरणभूषितसर्वांगसुशौर्यनिधेनमस्तेसंनद्धकृष्णध्वजपताकोपशोभितेन
६ कृष्णसिंहरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नागच्छसर्पमृत्युभ्यांसहपद्मनैरृतिद
लमध्येसीसकप्रतिमांदक्षिणामुखींशूर्पाकारपीठेऽधितिष्ठबर्बरजार्थतामावाह
याम्यहंदक्षिणपार्श्वेपूर्ववद्ध्यात्वावाहनानंतरं॥आयंगौरित्यस्यसार्परा ॥राम०॥
ज्ञीसर्पीगायत्री॥आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः॥पितरंचप्रयन्त्स्वः॥इमं ॥५९॥

मंत्रमुच्चार्य॥अक्षसूत्रधरान्कुंडलिकाकारपुच्छानेकभोगान्स्त्रिभोगान्भी
षणान्राहुधिदेवताःसर्पानावाहयामि॥वामपार्श्वेपूर्ववद्ध्यात्वानंतरंप
रंमृत्यादित्यस्यसंकुसुकोमृत्युस्त्रिष्टुप्॥परंमृत्योअनुपरेहिपंथांयस्तेस्वइ
तरोदेवयानात्॥चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतवीरान्
इमंमंत्रमुच्चार्य॥कालवदनंनित्यंगभीषणंपाशदंडधरंसर्पदृष्टिकरोमाणं
राहुप्रत्यधिदेवतांमृत्युमावाहयामि॥पलाशुंतरदलेपूर्ववद्ध्यात्वानंतरंके
तुंकृण्वन्नित्यस्यमधुछंदाःकेतुर्गायत्री॥केतुंकृण्वन्नकेतवेपेशोमर्याअपेश

॥प्र०र०॥ मे॥ सस्रुषङ्गिरजा यथा॥ इमं मंत्रमुच्चार्य॥ भगवन्केतोकामरूपेनेमिनीगे
॥५२॥ त्रमध्यदेशोऽश्वरधूम्रवर्णध्वजाकृते हि भुजगदावरदानां कित चित्रां बरमा॰
ल्यानुलेपन वैडूर्यमयाभरणभूषितसर्वांगचित्रशांकेन मस्तेसंत्र इचित्र
ध्वजपताकोपशोभितेन चित्रकेपोनरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नाग
छ ब्रह्मचित्रगुप्ताभ्यां सहपद्मवायव्यदलमध्ये कांस्यप्रतिमां दक्षिणमुखीं
ध्वजाकारपीठे धितिष्ठ प्रजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वपूर्ववद्धा ॥राम०॥
इत्यनंतरं ब्रह्मजज्ञानमित्यस्य नकुलो ब्रह्मा त्रिष्टुप्॥ ब्रह्मजज्ञानं प्रथमं ॥५२॥

पुरस्ताद्विसीमतः सुरुचो वेन आवः॥ सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनि
मसतश्च विवः॥ इमं मंत्रमुच्चार्य॥ पद्मासनस्थं जटिलं चतुर्मुखमक्षमालास्रुक्व
पुस्तककमंडलुधरं कृष्णाजिनवाससं पार्श्वस्थितहंसकेतुमधिदेवतां ब्रह्माण
मावाहयामि॥ वामपार्श्वपूर्ववद्ध्याहृती रुच्चार्य॥ सचित्र चित्रमित्यस्य भरद्वा
जऋषिश्चित्रगुप्तस्त्रिष्टुप्॥ सचित्र चित्रं चितयंतमस्मे चित्रक्षत्र चित्रतमं वयोधां॥ चं
द्रं रयिं पुरुवीरं बृहंतं चंद्र चंद्राभिर्गृणते युवस्व॥ इमं मंत्रमुच्चार्य॥ उदीच्यवे
षधरं सौम्यदर्शनं लेखनीपत्रोपेतहिमुत्तकेतुं प्रत्यधिदेवतां चित्रगुप्तमावा

॥प्र०र०॥
॥५३॥
हयामि ॥ अथ कर्मसाद्गुण्यकरदेवतावाहनं शुक्लतंदुलपीठे कुर्यात् ॥
शनैर्वामप्रदेशे ग्रांतदनंतरं ॥ आतूनइंद्रेत्यस्य कण्वः कुसीदी विनायको गा
यत्री ॥ आतू न इंद्र क्षुमंतं चित्रं ग्राभं संगृभाय ॥ महाहस्ती दक्षिणेन ॥ इमं मंत्र
मुक्त्वा ॥ चतुर्भुजं त्रिनेत्रं गजाननं नागयज्ञोपवीतिनं चंद्रधरं दंतासे माला
परशुमोदकोपेतं चतुर्भुजं त्रि विनायकमावाहयामि ॥ २ ॥ दक्षिणतो व्याहृ
त्यनंतरं जातवेदसे इत्यस्य कश्यपो दुर्गा त्रिष्टुप् ॥ जातवेदसे सुनवाम सो ॥ए०म०॥
ममरातीयतो निदहाति वेदः ॥ स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरि ॥५३॥

तात्यग्निः इमं मंत्रमुक्त्वा शक्तिबाणशूलखड्गचक्रचंद्रबिंबखेटकपाल
शुक्लटंकोपेतदशभुजां सिंहासनारूढां दुर्गास्य दैत्यसंहारिणीं दुर्गामावा
हयाम्यहं २ दक्षिणतो व्याहृत्यनंतरं क्षेत्रस्य पतिनेत्यस्य वामदेवः क्षेत्र
पतिरनुष्टुप् क्षेत्रस्य पतिना वयं हितेनेव जयामसि गामश्वं पोषयित्वा
न्स नो मृळातीदृशे इमं मंत्रमुक्त्वा श्यामवर्णं त्रिलोचनं स्मूर्ध्वकेशं सुदंष्ट्रं
भ्रकुटीकुटिलाननं नूपुरालंकृतांघ्रिं सर्पमेखलायापुतसवीणमतिक्रं
हुंकारदंष्ट्रावदनं उल्कावल्लविकरोटिकाधारिणमुपरगकोपीनं चंद्रमौलिं

प्र०र० दक्षिणहस्तैः शूलं वेतालखड्गं दुंदुभीन्दधानं वामहस्तैः कपालघंटाचर्म
५४ बाणान्दधानं भीमं दिग्वाससं समीतप्रकृतिं क्षेत्रपालमावाहयामि ३ तद्दक्षि
णतो वाय्वाहूत्सनं क्राणाशिशुरित्यस्य त्रितो वायुरुष्णिक् क्राणाशिशुर्मही
नां हिन्वन्नृतस्य दीधितिं विश्वापरिप्रिया भुवदधद्विता इमं मंत्रमुक्त्वाधा
वद्धरिणपृष्ठगतं ध्वजवरदानधारिणं धूम्रवर्णं वायुमावाहयामि ७
ततो दक्षिणतो व्याहृत्यनंतरं मादित्प्रत्नस्येत्यस्य वत्स आकाशो गायत्री आ
दित्प्रत्नस्य रेतसो ज्योतिष्पश्यंति वासरं परो यदिध्यते दिवा इमं मंत्रमु रम० ५४

क्त्वाथ नीलोत्पलाभं नीलांबरधारिणं चंद्रार्कोपेतद्विभुजं वरदमाकाश
मावाहयामि ८ तद्दक्षिणतो व्याहृत्यानंतरं अश्विनावर्तिरस्मदेत्यस्य
राहूगणो गोतमोश्विना उष्णिक् अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्य
वत् अर्वाग्रथं समनसा नियच्छतं इमं मंत्रमुक्त्वा प्रत्येकमोषधिपुस्तको
पेतदक्षिणवामहस्तावन्योन्यसंयुक्तदेहावेकस्य दक्षिणपार्श्वे परस्य वाम
पार्श्वे रक्तपांडुरकरसूनक्ताबरधारिणौ नारीमुखोपेतौ देवभिषजावश्विना
मावाहयामि अथ क्रतुसंरक्षदेवतावाहनं पूर्वीनं तुलपीठेषु कुमारि

प्र०र० तद्यथा। तत्र प्राग्दलाग्रे पूर्वव्याहृतीरुक्त्वा इंद्रव इत्यस्य मधुच्छंदा इंद्रो गाय
५५ त्री इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः अस्माकमस्तु केवलः इमं मंत्रमुच्चा
र्य स्वर्णवर्णं सहस्राक्षं वज्रपाणिं शचीप्रियमिंद्रमावाहयामि आग्नेयदलाग्र
व्याहृत्यनंतरं अग्निमीळे इत्यस्य मधुच्छंदा अग्निर्गायत्री अग्निमीळे पुरोहितं यज्ञ
स्य देवमृत्विजं होतारं रत्नधातमं इमं मंत्रमुक्त्वा स्वर्णवर्णं सप्तार्चिषं सप्तह
स्तं शक्त्यज्ञस्रुक्करं स्रुवतोमरध्वजं वह्निपात्राणि दधानं स्वाहाप्रियं मेषवाहं र०म०
नमग्निमावाहयामि याम्यदलाग्रे व्याहृत्युक्त्वा यमाय सोमं इत्यस्य यमो ५५

नुष्टुप् यमाय सोमं सुनुत यमाय जुहुता हविः यमं ह यज्ञो गच्छत्यग्निदूतो अरं
कृतः रक्तवर्णं दंडतोमरधरं महिषवाहनं इलाप्रियं यममावाहयामि नैर्ऋ
त्यदलाग्रे व्याहृत्यनंतरं मोषुणः इत्यस्य घोरः काण्वो निर्ऋतिर्गायत्री मोषुणः
परापरा निर्ऋतिर्दुर्हणा वधीत् पदीष्ट तृष्णया सह नीलवर्णं खड्गचर्मधरमू
र्ध्वकेशं नरवाहनं कालिकाप्रियं निर्ऋतिमावाहयामि पश्चिमदलाग्रे व्याहृत्य
नंतरं उदुत्तमं मुमुग्धि न इत्यस्य शुनःशेपो वरुणो गायत्री उदुत्तमं मुमुग्धि नो
वि पाशं मध्यमं चृत अवाधमानि जीवसे रत्नभूषणं नागपाशधरं मकरवा

ग्र०दि० हनेपद्मिनी। प्रियं वरुणमावाहयामि वायव्यदलाग्रेव्याहृत्यनंतरं तववायो
इत्यस्यआंगिरसोव्याश्वो वायुर्गायत्री तववायवृतस्पते त्वष्टुर्जामातरद्भु
५६ त अवांस्यावृणीमहे श्यामवर्णं हेमदंडधरं कृष्णमृगवाहनं जगत्प्राण
रूपं मोहिनी। प्रियं वायुमावाहयामि उत्तरदलाग्रेव्याहृत्यनंतरं तत्वनः सो
मविश्व इत्यस्य गोतमः सोमो गायत्री तत्वंसोमविश्ववितो गोपाअदाभ्यास
व सेधराजन पश्चिधाविवोमदेमानो दुःशंस ईशताविवस्वते इमंमंत्रमुक्त्वा राम०
स्वर्णवर्णं निधीश्वरं कुंतपाणिमश्ववाहनं चित्रिणी। प्रियं कुबेरमावाह ५६

यामि ईशानदलाग्रेव्याहृत्यनंतरं कद्रुद्रायेत्यस्य कण्वो रुद्रो गायत्री क
द्रुद्रायप्रचेतसे मीळ्हुष्टमाय तव्यसे वोचेमशंतमं हृदे इमंमंत्रमुक्त्वा शु
द्धस्फटिकवर्णं वरदाभयशूलाक्षसूत्रधरं वृषभवाहनं गौरिप्रियमीशा
नमावाहयामि एवमेकचत्वारिंशद्देवतां आवाहयेन्मंत्रैः चतुर्थ्यं
तैः स्वस्वनाममंत्रैः क्रमेण सर्वोक्त द्रव्यैः पुष्पसमर्पणपर्यंतां ग्रहदेवतानां
पूजां कृत्वा कर्मसाद्गुण्यदेवताः क्रतुसंरक्षकदेवतावरुणं च मंडलयजगं
धशतपत्रपुष्पैस्तथैव पूजयेत् अथहोमः सचसमिच्चरुआज्यैः प्रतिद्रव्य

प्रतिग्रहं एकाचाचाभिः सहस्रपराभिरंकुतिभिर्निमिनशक्त्यानुसारेण प्रधा
नदेवतांशेन पार्श्वदेवतानां तदर्धीनेतरेषां स्वाहृतेनीमभिस्तत्तन्मंत्रैर्वा पालिनै
कसकृद्देवदानेन चरुहोमः तत्राचार्यः प्रत्यगग्रेष्वासीनः प्राणानायम्य पूर्ववत्
संकल्प्याग्निमुखं वक्ष्यमाणप्रकारेण प्रागुक्तलक्षणे कुंडे स्थंडिले वोपलेपाद्यग्नि
प्रतिष्ठापनांतं कृत्वा कृत्विग्न्वारब्धः समिद्द्वयमादाय देशकालौ निर्दिश्याद्य पक्ष
माणग्रहमुख्य प्रधानहोमे देवतापरिग्रहार्थं अन्वाधानं करिष्ये अस्मिन्नन्वा
हितेग्नाविन्ध्मादिचक्षुषी आज्येनेत्यंतमुक्त्वा प्रधानदेवतामादित्यं अधिदेवताम राम

५७

ग्निं प्रत्यधिदेवतां रुद्रं मर्कसमिद्भिर्वाज्यैः प्रधानदेवं सोमं अधिदेवतां आपः प्रत्यधि
देवतां गौरीं पालाशसमिद्भिर्वाज्यैः प्रधानदेवतामंगारकं अधिदेवतां भूमिं प्रत्य
धिदेवतां स्कंदं खदिरसमिद्भिर्वाज्यैः प्रधानदेवतां बुधं अधिदेवं विष्णुं प्रत्यधिदेवं
पुरुषं आपामार्गसमिद्भिर्वाज्यैः प्रधानदेवं बृहस्पतिं अधिदेवमिंद्रं प्रत्यधिदे
वं ब्रह्माणं अश्वत्थसमिद्भिर्वाज्यैः प्रधानदेवं शुक्रं अधिदेवमिंद्राणीं प्रत्यधिदेवमिं
द्रं औदुंबरसमिद्भिर्वाज्यैः प्रधानदेवं शनिं अधिदेवं प्रजापतिं प्रत्यधिदेवं यमं शमि
समिद्भिर्वाज्यैः प्रधानदेवं राहुं अधिदेवं सर्पान् प्रत्यधिदेवं कालं दूर्वाज्यैः प्रधानदेवं

प्र० २०
५८

केतुंअधिदेवंब्रह्माणंप्रत्यधिदेवंचित्रगुप्तंकुशचर्वाज्यैःविवक्षितसंख्याकैःपार्श्वदेव
ताःन्यधानदशांशेनक्रतुसाद्गुण्यदेवताःविनायकंदुर्गांक्षेत्रपालंवायुमाकाश
मश्विनौक्रतुसंरक्षकदेवताःइन्द्रमग्निंयमंनिर्ऋतिंवरुणंवायुंवायुंकुबेरंईशानंप्र
धानत्रिंशांशेनअग्निंवायुंसूर्यंप्रजापतिंतिलव्रीहिभिर्विवक्षितसंख्ययासूर्यमा
ज्येनत्रयोदशवारंअग्निंचतुस्त्रिंशद्वारंआज्येनद्वात्रिंशद्वारंरुद्रंशेषेणस्विष्टकृत
मित्यादिसद्योपक्ष्यप्रक्षुरस्यंतमुक्ताभूर्भुवःस्वःस्वाहेत्यग्नावाधायप्रजापतिंमनसै
स्तुदेशत्यागंकुर्यात् ततोबर्हिःसंहननाज्येदर्भाग्रद्वयनिधानंकृत्वालौकिकस्मि राम ५८

द्धांनतिलव्रीहिभिःसहाज्यंत्रिःपर्यग्निकृत्वाज्यमुद्वास्यबर्हिषिनिधायस्रुवंस्रुवसंमार्ज
नंकृत्वाअन्नंपात्रांतरेपृथक्कृत्वाग्नावधिश्रित्यस्रुवेणाभिघार्योदगुद्वास्याज्याद्द
क्षिणतोबर्हिष्यासाद्याप्रत्यभिघार्यगन्धालंकरणाद्याज्यभागांतंकृत्वाक्रमेणादत्ता
दानांनेभ्यएकचत्वारिंशद्देवेभ्यआवाहनोक्तैस्तत्तन्मंत्रैःसमिच्चर्वाज्यैःप्रागुक्तसंख्या
काआहुतीर्जुहुयात् तत्रायंप्रकारः समिधंमूलतोंगुलंविहायमध्यमानामिकां
गुष्ठैर्गृहीत्वाजुहुयात् चरुंयाससमंपाणिनैवाज्यंस्रुवेणैवतदभावेअश्वत्थपर्णेन
वा ततोव्यस्तसमस्तव्याहृतिभिप्रभृततिलव्रीहीन्पाणिनाहुत्वासर्वपापकरुद्धाना

प्र०
५९

ज्येन जुहुयात् मंत्रैः तेच मंत्राः सूर्यो न इति पंचर्चस्य सूक्तस्य सूर्यपुत्रश्चक्षुः सूर्यो गाय
त्री सूर्यो नो दिवस्पातु वातो अंतरिक्षात् अग्निर्नः पार्थिवेभ्यः जोषा सवितर्यस्य ते हरः
शतं सवां अर्हति पाहि नो दिद्युतः पतंत्याः चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः चक्षु
र्धाता दधातु नः चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः संचेदं विच पश्येम सुसंदृशं त्वा
वयं प्रति पश्येम सूर्य विपश्येम नृचक्षसः उदुत्यमिति मंत्रस्य कण्वपुत्रः प्रस्कण्वः सूर्यो
गायत्री उदुत्यं जातवेदसं देवं वहंति केतवः दृशे विश्वाय सूर्यं नमो मित्रस्येति मंत्रस्य
सूर्यपुत्रो भितपाः सूर्यो जगती नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सप

राम
५९

र्यत॰ चित्रं देवानामिति मंत्रस्य आंगिरसः कुत्सः सूर्यस्त्रिष्टुप् उद्वेति सुभग इति पंचर्चस्य
मैत्रावरुणो वसिष्ठः सूर्यस्त्रिष्टुप् त्वमग्ने प्रथम इत्यष्टादशर्चस्य सूक्तस्य आंगिरसो हिर
ण्यस्तूपोग्निर्जगती अंत्या द्वयोः षोडश्यास्त्रिष्टुभः त्वमग्ने द्युभिरिति षोडशस्य सूक्तस्य
गृत्समदोग्निर्जगती कद्रुद्रायेति नवर्चस्य सूक्तस्य घोरः कण्वो रुद्रो गायत्री तृतीया
मैत्रावरुणी इमा रुद्राय तवस इत्येकादशर्चस्य सूक्तस्य कुत्सो रुद्रो जगत्यंते त्रिष्टु
भौ आ ते पितर्मरुतामिति पंचदशर्चस्य सूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप् एतैरेकोना
शीति मंत्रैः प्रतिमंत्रं स्वाहांतैराज्यं हुत्वा द्यौः पादवाद्दिक्शब्दैर्धामारोधिमेकचत्वारिं

शद्देवताभ्योवरुणायचधूपदीपनैवेद्यतांबूलादीन्समर्प्यपलीरंतुनयंतइतितान्संप्रा
र्थ्यऋत्विगन्वारब्धश्चरुतिलव्रीहिशेषेणस्विष्टकृतंहुत्वाइध्मसन्नहनीमग्नौप्रक्षि
प्यप्रायश्चित्तादिहोमशेषंसमाप्ययजमानान्वारब्धआचार्यःपूर्णाहुतिंस्थाल्या।पाक
वक्ष्यमाणप्रकारेणहुत्वाविश्वेभ्योदेवेभ्यःसंस्रावंहुत्वापूर्णपात्रनिनयनोपस्थान
परिस्तरणविसर्जनपरिसमूहनंपर्युक्षणाद्यर्चनंपात्रोत्सर्जनादिकुर्यात् अथ
मंडपेशानेपंचरंगैःस्वस्तिकंकृत्वाचतुष्पाद्दीर्घचतुरस्रंसोन्नतरपट्टंतत्रपीठेनि
धायतत्रोरगग्वास्तमलीन्हरिनरभोनास्तीर्यतत्रसामात्यंयजमानंप्राङ्मुखमुप

वेश्याचार्यऋत्विग्भिःसहमंगलवाद्यैरभिषेककुंभोदकंपात्रांतरआदायप्रत्यङ्मुखस्ति
ष्ठन्नुपालाशपौदुंबर्याद्वशाखयासहिरण्यपवित्रयासकुशदूर्वापल्लवयाहस्तमं
तर्धायोदकष्टयद्भिराब्लिंग्याभिर्वारुणीभिःपावमानीभिरन्याभिश्चशांतिपवित्रलिंगा
भिर्यताभिएकमंत्रैःसुरास्त्वामितिसूक्तेनेमाआपःशिवतमाइतित्र्चेनदेवस्यत्वेति
यजुषांभूर्भुवःस्वरितिचव्याहृतिभिरभिषिंचेत् तेचमंत्राः आपोहिष्ठेतितनवर्चस्यस
क्तस्यां वरीयसिंहं धृहीपआपोगायत्री पंचमीवर्धमानासप्तमीप्रतिष्ठाअंत्येद्वे
नुष्टुभौ त्रसंग्रजरत्येस्यचर्वस्यसूक्तस्यत्रिवरुणस्त्रिष्टुप्स्यादिष्टयेतिदशर्चस्यसू

पु० ऽस्य मधुच्छंदाः पवमानसोमो गायत्री शंन इंद्राग्नी इति पंचदशर्चस्य …स्य वसिष्ठो
४५ विश्वेदेवास्त्रिष्टुप् पवित्रंते विततमिति पंचर्चस्य वर्गस्यांगिरसः पवित्रः पवमानसोमो
गायत्री अथ ग्रहमंत्राः ग्रहाणामादिमो रादित्यो लोकरक्षणकारकः विषमस्थानसंभूतां
पीडां हरतु ते रविः १ रोहिणीशः सुधामूर्तिः सुधागात्रः सुधाशनः विषमस्थानसंभूतां
पीडां हरतु ते विधुः २ भूमिपुत्रो महातेजा जगतां भयकृत्सदा वृष्टिकृद्वृष्टिहर्ता च पीडां
हरतु ते कुजः॥३॥ उत्पातरूपो जगतां चंद्रपुत्रो महाद्युतिः सूर्यप्रियकरो विद्वान् पीडां राम
हरतु ते बुधः ४ देवमंत्री विशालाक्षः सदा लोकहिते रतः अनेकशिष्यसंपूर्णः पीडां हरतु ते गुरुः ३९

दैत्यमंत्री गुरुस्तेषां प्राणदश्च महामतिः प्रभुस्ताराग्रहाणां च पीडां हरतु ते भृगुः
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः मंदचारः प्रसन्नात्मा पीडां हरतु ते शनिः
महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः अतनुश्चोर्ध्वकेशश्च पीडां हरतु ते तमः ७
अनेकरूपवर्णैश्च शतशोथ सहस्रशः उत्पातरूपो जगतां पीडां हरतु ते शिखी ८
अथ देवमंत्राः सुरास्त्वामभिषिंचंतु ब्रह्माविष्णुमहेश्वराः वासुदेवो जगन्नाथस्तथा
संकर्षणो विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते आखंडलोग्निर्भगवान्य
मो वै नैर्ऋतस्तथा वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे

प्र०
६२

दिक्पालाःपांतुतेसदा कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिश्श्रद्धाक्रियामतिः बुद्धिर्लज्जावपुः
शांतिस्तुष्टिःकांतिश्चमातरः एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः आदित्यश्चंद्र
माभौमोबुधजीवसितार्कजाः ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चपार्थिताः देवदान
वगंधर्वयक्षराक्षसपन्नगाः ऋषयोमुनयोगावोदेवमातरएवच देवपत्न्योद्रुमा
नागादैत्याश्चाप्सरसांगणाः अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच औष
धानिचरत्नानिकालस्यावयवाश्चये सरितःसागराःशैलास्तीर्थानिजलदानदाः
एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये एतैर्मंत्रैःप्रतिमंत्रमभिषिच्यश्रीसूक्तेनहिर राम ६२

ण्यवर्णांहरिणीमित्यादि इमाआपःशिवतमाइतिऋक्त्रयेणदेवस्यत्वेतियजुषाभूर्भुवः
स्वरितिव्याहृतिभिश्चाभिषिंचेत् एवमभिषिक्तोयजमानःश्वेतांबरधरःस्रग्वयुग्मंगंध
माल्याभरणंचबिभृयात् ततःआचार्योदिक्षुविदिक्षुचबलिमुत्क्षिप्यसुवासिनीराज
नंकारयेत् अथयजमानोग्रहदेवताभ्यश्चतुर्थ्यंतदेवतानामभिःपुष्पाणिसमर्प्य
चार्पणव्याहृत्युच्चारणपूर्वकंग्रहोक्तासनंकारयित्वाचार्यप्रभृतिभ्योजपहोमफलं
गृहीत्वातेभ्यस्तेभ्योदक्षिणांदद्यात् गौःशंखोरक्तोनड्वान्हिरण्यंपीतवासःश्वेताश्वः
कृष्णागौःकालायसंहस्तीछागोगावेतिक्रमेणाअत्रन्युनेदक्षिणायांहिरण्यंनसमा

प्र॰यो॰
६३

कार्या आद्यगवाय एतदभावे सर्वयज्ञदेवेभ्यो यथाशक्ति हिरण्यं वा दद्यात् आचा
र्याय द्विगुणं अन्येभ्यश्च यथाशक्ति भूयसीं ततः कांस्यपात्रगताज्ये रूपप्रतिरूपो बभ
वेति मंत्रेण सकुटुंबः स्वप्रतिरूपं प्रेक्ष्य आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतिः आ
ज्यं सुराणामाहारः आज्ये देवाः प्रतिष्ठिता इति मंत्रं पठित्वा तदाज्यं सदक्षिणं ब्राह्मणा
य दद्यात् ततो भूरिदक्षिणां दत्वा संकल्प्य वा एकस्या आहुतेर्दैकं शतस्यैकं सहस्रं वा
एकं यथाशक्ति वा ब्राह्मणान् भोजयित्वा तेभ्यः शांतिः पुष्टिश्चास्त्विति आशिषो गृही
त्वा तान्संप्रार्थ्य प्रणिपत्य यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्ण

राम
६३

तां याति सद्यो वंदे तमच्युतमिति पठित्वा प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्म
रणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः इत्युक्त्वा न्यूनातिरिक्तच्छिद्रत्वार्थं यथाशक्ति
अच्युतानंतगोविंदेति नाममंत्रं जप्त्वा ग्रहयज्ञफलं श्रीकृष्णाय समर्प्य स्वयं हृष्टमना
बंधुभिः सह भुंजीत अयं चाश्वलायनगृह्यपरिशिष्टोक्तो ग्रहमखः आश्वलायना
नामेव बह्वृचानां स्वगृह्योक्तं यस्य कर्म प्रचोदितं तस्य तावता शास्त्रार्थे कृते सर्वकृ
तो भवेदिति वचनात् एवमन्येषामपि यदि स्वगृह्ये तदा युक्तस्तदा स एव येषां तु गृह्या
दौ नोक्तस्तेषां याज्ञवल्क्यादिस्मृत्युक्तः मत्स्यपुराणाद्युक्तो वानुष्ठेयः स्मृत्यादेः सा

प्र० र०
६४

आरण्यादितिदिक्   इतिश्रीमद्विद्वन्मुकुटमाणिक्यश्रीरामेश्वरभट्टसूनुनाराय
णभट्टकृतेप्रयोगरत्नेऽवनवग्रहमखप्रयोगः॥ ॥अथविवाहोत्तरकार्तव्योपि
स्थालीपाकःप्रथमोच्यते तत्रांगानामुक्तानामन्येषामपिनिर्देशेनप्राप्तेः सचविवा
हानंतरकर्तव्यःगृहप्रवेशनीयहोमानंतरमाविन्यांपौर्णमास्यामारंभणीयः तत्र
मावास्यायांचतुर्थीहोमात्प्रत्यगपिपौर्णमासीचेत्तत्रारंभः यद्विवारंभकालेम
लमासगुरुशुक्रास्तबाल्यवार्द्धक्यग्रहणपौषमासादिभवतितदापिप्रारंभः कार्यः
यानितुतत्रारंभानिषेधकानिउपरागेधिमासश्चयद्प्रथमपर्वणि तथामलिम्लु

राम
६४

चेपौषेनान्वारंभणमिष्यते गुरुभार्गवयोर्मौढ्येबंदमर्पग्रहेतथाइत्यादीनिसंग्रहका
रादिवचनानि अतिपातेसतितयोःप्रशस्तेमासिपुण्यभेदेतिस्थालीपाकारंभकालः
अथपर्वनिर्णयः पौर्णिमादर्शश्चपर्व तत्रान्वाधानंप्रतिपदिष्टिरित्युत्सर्गः तत्रपर्वच
तुर्थांशः प्रतिपदश्चाद्यास्त्रयोंशाःसूर्योदयोत्तरेमुहूर्तत्रयेपिविद्यमानायागकालः
सूर्योस्तमानपर्यंतंयत्रपर्वाखंडंतत्रनसंदेहः यत्तुखंडपर्वतत्रनिर्णयः आवृत्तमध्ये
ततःपर्वप्रापर्वप्रतिपदोःसंधौतदहर्यागःपूर्वेद्युरन्वाधानं मध्याह्नात्परेसंधौतदहर
न्वाधानंपरेद्युर्यागइति संधिश्चप्रतिपदोर्द्धासरदृष्योरर्द्धपर्वणिप्रक्षिप्तलेयः इष्टेः

प्र० ६५ पर्वणिसमाप्तौपुनरस्यकर्त्तव्यतापत्तेःसाप्रतिपद्येवसमापनीयानवर्यमध्ये अ
पराह्णसंधौपरेद्युः प्रतिपच्चतुर्थांशेपियागेनदोषः चंद्रदर्शनदिनेष्टिनिषेधवच
नानि ननिर्णयकानि संभवेयाज्यानि यातुपौर्णमासीसंगवादूर्ध्वमावर्त्तनात्सर्वं
संधिसाद्यस्कालेति तस्यामेवअन्वाधानंयागश्च अथविकृतौनिर्णयः आव
र्त्तनेतःपूर्वंवापर्वसंधौतदहरादौप्रकृतियागंकृत्वापश्चादाग्रयणादिविकृतिःका
र्यापरसंधौतुविकृतियागएवसंधिदिनेप्रकृतिस्तुतदुत्तरदिनेइति अथस्थंडिलक राम ६५
रणाविधिः निर्णयः तत्रचौलादिहोमौलौकिकाग्नौ पार्वणस्थालीपाकश्रवणा

कर्मादिहोमागृह्याग्नौतत्रलौकिकाग्नौहोमेस्थंडिलकरणादिरग्निप्रतिष्ठापनांतो
विधिर्नियतः गृह्याग्निहोमेपिगृहप्रवेशवास्तुहोमशूलगवान्वष्टक्यादिषुनियतः
धार्याधानेनतदसंभवात् यदापिसमिदादावग्निसमारोपस्तदागृह्याग्निकर्तव्येपि
स्थालीपाकादौनियतः एतत्सर्वमभिप्रेत्यपत्रकृच्चहोष्यन्स्यादितिगृह्योक्तानिप्रति
ष्ठापनविधेर्विषयंप्रदर्शयितुर्महाकारिकाकारः प्रतिष्ठाप्याथलेखासुहोमायालं
हविर्भुजं एतदंतंप्रकुर्वन्होष्यन्संस्थापनेनलेति अन्यथासंस्थापनेहोष्यानिति
व्यर्थंस्यात् एवंस्थंडिलकरणादिविषयंनिर्णयस्थंडिलादिकुर्यात् तत्रयजमानः

प्र० ६६ कृतनित्यक्रियः शुचिः परिहितधौतवासा दर्भपाणिः पीठोपविष्टः प्राङ्मुखो वाग्य
तोद्वराचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थममुककर्मक
रिष्ये तदंगहोमं कर्तुं स्थंडिलादि करिष्ये इति संकल्प्य गोमयादिलिप्ते शुचौ देशे शुद्ध
मृदईशान्यारंभं उदक्संस्थं चतुरंगुलोन्नतं त्यवा चतुर्दिक्षु मिलित्वा द्विसप्तमांगु
लोन्नतंगुलपारधिकं फलितमष्टादशांगुलविस्तृतं होमानुसारेण तदधिकं वा न
नुततो न्यूनं मध्योन्नतं स्थंडिलं कुर्यात् तत्रोमयेन प्रदक्षिणमुपलिप्य दक्षिणे देशोउ राम
दीच्यां द्विप्रतीच्यामद्भिस्त्र्यंगुलानित्यक्तादक्षिणेपक्रमामुक्तंस्य प्रादेशमात्रं ६६

मेकां लेखां लिखित्वा तस्या दक्षिणोत्तरयोः प्रागायते पूर्वरेखया असंसृष्टे प्रादेश
संमिते द्वे लेखे लिखित्वा तयोर्मध्ये परस्परमसंसृष्टा उदक्संस्थाः प्रागायता प्रादेश
सम्मितास्तिस्र इति षट् लेखा दक्षिणस्य शकलेन दक्षिणहस्तेनोल्लेख्य लेखासु
तत्रकलमुदगग्रं निधाय स्थंडिलमद्भिरभ्युक्ष्य शकलमाग्नेय्यां निरस्य प्रक्षाल्य पा
णिं वाग्यतो भवेत् ततस्तेजसेना संभवे मृन्मयेन वा पात्रेणमुखेन संपुटीकृत्य सुवा
सिन्याश्रोत्रियागाराद्वा गृहाद्वा समुद्धृतं निर्धूममग्निमाहृतं स्थंडिलादाग्नेय्यां नि
धाय्य तुष्टो दूर्वा त्वा आग्नेयो वसुभूतोग्निं त्रिष्टुप् एग्नेर गणेणागौतमोग्निर्द

प्र०
६१ ष्टुप् अग्न्यावाहने विनियोगः ॐ जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि वि
द्वान् विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि एह्यग्न इह होता निषी
दादब्धः सुपुरएता भवनः अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान्
इत्यक्षतैराबाह्या वाहनं दूरीकृत्य समस्तव्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृ
हती अग्निप्रतिष्ठापने विनियोगः ॐ भूर्भुवः स्वरिति आत्माभिमुखं पाणिभ्यां पद्
लेख्यासु तत्तत्कर्मविहितनामकममुकनामकमग्निं प्रतिष्ठापयाम्यग्निं प्रतिष्ठाप्य प्रो
क्षतेंधनानि निक्षिप्य वेणुधमन्या प्रबोध्य ध्यायेदेवं चत्वारि शृंगेति वामदेवोग्निस्त्रि राम
६१

ष्टुप् अग्निमूर्तिध्याने विनियोगः ॐ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश सप्तमंत्राश्च सप्तहस्तश्चतुःशृं
गः सप्तजिह्वो द्विशीर्षकः त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः स्वाहां तु दक्षिणे पा
र्श्वे देवीं वामे स्वधां तथा बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवं तोमरं व्यजनं वामैः
घृतपात्रं धारयन् आत्माभिमुखमासीन एवंरूपो हुताशन हुताशन इति ततोपदिस
मिदादीन् समारोपने अग्निस्त्वं हि प्रत्यवरोहणं कार्यं तद्येवं ॐ प्रत्यवरोह जातवेदः पुनस्त्वं
देवेभ्यो हव्यं वहनः प्रजानन् प्रजां पुष्टिं रयिमस्मासु धेह्यथा भवयजमानाय शंयोः

प्र० ६८ इतिमंत्रेणसमारोपिताग्निंसमिधंस्थापितेग्नौप्रक्षिपदिति॥अथवाग्रस्यवरोहणंकृत्वा
पश्चादेखादिकृत्वास्थंडिलेतंस्थापयेदिति एतदंतंसंस्थापितेग्नौहोमकार्यं नित्यधा
रितहोमेतुनैतावत् ततःपार्वणस्थालीपाकेप्रधानदिनात्पूर्वदिनेसद्यस्कालायांपौ
र्णमास्यामशक्तौवाप्रधानदिनएवप्रातरौपासनंहुत्वान्वाधानंकुर्यात् तद्येत्थं आत्म
म्यश्राणानामस्यसमिद्धपंचपंचादायदेशकालौस्मृत्वाममोपात्तदुरितक्षयद्वाराश्री
परमेश्वरप्रीत्यर्थंदर्शपूर्णमासाभ्यांस्थालीपाकाभ्यांयक्ष्येतत्रेदानींपौर्णमासेनय राम ६८
क्ष्येदर्शेतुपूर्वसंकल्पितेनदर्शस्थालीपाकेनयक्ष्यइतिविशेषः तत्रदेवतापरिग्रहार्थं

। अन्वाधानंकरिष्यइतिसंकल्प्यास्मिनन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिंप्रजा
पतिंचाघारदेवतेआज्येनअग्नीषोमौचक्षुषीआज्येनअग्निमग्निषोमौचप्रधानदेव
तेचरुद्रव्येण दर्शेतुअग्निमिंद्राग्नीचप्रधानदेवतेचरुद्रव्येणेतिविशेषः शेषेणस्विष्ट
कृतमग्निमिध्मसन्नहनेनरुद्रमपासमग्निंदेवान्विष्णुमग्निंवायुंसूर्यंप्रजापतिंचैताः
प्रायश्चित्तदेवताआज्येनविश्वान्देवान्संस्रावेणज्ञाताज्ञातदोषनिवर्हणार्थंत्रिवार
मग्निंमरुतश्चाज्येनयक्ष्ये अंगदेवताःप्रधानदेवताःसर्वाःसंनिहिताःसंतुसांगेनक
र्मणाभ्योयक्ष्येसद्यस्कालेतुसद्योयक्ष्यइतिसंकल्प्यतत्स्त्रींसमस्तव्याहृतिभिर्वास

मिद्धोमंकुर्यात् व्याहृतिपक्षेव्याहृतीनामित्यादिपूर्ववत् अन्वाधानसमिद्धोमेविनि
योगः ॐभूर्भुवःस्वःस्वाहेति प्राजापतयइदंनममेतित्यागः तंचाग्निंधारयेत् संकटे
तुतुभ्यंताइत्यृचाभ्यांहुत्वासमारोपयेत् तुभ्यंताविरूपोग्निर्गायत्री कृतान्वाधानाग्ने
समारोपाधिकारार्थेप्रायश्चित्ताज्यहोमेविनियोगः तुभ्यंताअंगिरस्तमविश्वाःसु
क्षितयःपृथक् अग्नेकामाययेमिरेस्वाहा अग्नयइदंनममेतित्यागः ततस्त्रिभिस्त्रि
भिःकुशदलैःसव्यपाणिमध्येदक्षिणंचोपरिकुर्वन् पूर्वदलाग्रेरुत्तरदलमूलैश्चत्रिसं
धंद्विगुणांरज्जुंकृत्वापुनर्दक्षिणमध्यःसव्यंचोपरिकुर्वन्नपेवत्रिगुणयेत् अंतेप्रद

क्षिणंग्रंथिंदध्यात् एवंषट्त्रिंशद्दर्भदलैरेकारज्जुर्भवति ततस्तस्यामुदगग्रायांप्रादेश
मात्रान्मुष्टिपरिमितान्दर्भानिधायतयाबर्हिर्द्विरावेष्ट्यरज्ज्वग्रेणरज्जुमूलसकृदावे
ष्टनद्वयशेषंपूर्ववेष्टनरज्वाअधस्तान्निनीयपरिस्तरणाग्रेदर्भैःसहग्रन्थ्यायत
नासभ्याद्धागेपरिनिदध्यात् ततोऽन्यथानादेश्येवकृत्वारज्वामुदगग्रयापाला
शंखादिरंअसंभवेशामिवायादियज्ञियवृक्षमयमरत्निमात्रंवितस्तिमात्रंवापंच
दशदारुकमिध्मंप्रागग्रंसकृदावेष्ट्यरज्जुमूलंसकृदावेष्ट्यपूर्ववन्निदध्यात् अन्ये
ध्माबर्हिर्बंधनेकेचिन्मंत्राविच्छंति तत्रबर्हिषि इंद्राण्यैसंनहनमं पूषातेग्रंथि

प्र॰ १० वध्वातु सतेमास्यादतिरध्मे पत्कल्लोरूपंकृत्वामाविशस्त्वंवनस्पतीनृतनत्त्वांअ
भ्यंचदशधासंभरामिसुसंभृतानाइत्यैकविंशतित्यत्रपंचदशदेत्युहेन अन्येत्वनोहे
समाहुः अपरेतुमंत्रेणैनेछंति ततःपत्नीअग्न्यायतनालंकरणंकुर्यात ततोदंप
तिगंधादिभिःस्वशरीरेअलंकृत्यताद्दिनेकल्हकपविक्रयमहासान्तनवद्दुभाषण
वोर्पादव्यसनपर्यंकशयनदंतधावनकरंभकुलस्थकोद्रववंचनकमसूरस्वंना
कक्षारलवणकोरदूषकमधुमाषमांसमद्यपरान्नोपवासतैलमैथुनानिवर्जयेत्तो
पयोमिश्रंहविष्यान्नंदधिसक्तुंजीयातांश्राद्धकृत्तौश्राद्धशेषमाषाधन्नंभुंजीतव्र राम १०

तलोपेव्रात्यैःसहसंवेशनेवाउपोष्यत्वमग्नेव्रतपाइत्यृचाज्याहुतिंजुहुयात् त्वमग्ने
इत्यस्यावत्सोऽग्निर्गायत्री व्रतलोपजनितदोषपरिहारार्थंआज्यहोमेविनियोगः
त्वमग्नेव्रतपाअसिदेवआमर्त्येष्वा त्वंयज्ञेष्वीड्यः स्वाहा व्रतपायाअग्नयइदं
नमम पद्दानिर्णीपादिपूर्वकंव्रतलोपायाग्नयेस्थालीपाकेनसमानतंत्रंकृत्वाचे
रुंप्रधानात्पूर्वंजुहुयात् ततःप्रातिपतिप्रातरौपासनंकृत्वाग्निंपरिसमुह्यपरिस्त
णीयात् तत्रैतं अग्न्यायतनाग्नेदक्षांगुलीपरिमितेदेशेईशानींदिशमारभ्यप्रदक्षि
णंसमंतात्सोदकेनपाणिनांत्रिःपरिमृज्यपूर्वंस्तृपरिनिहितदर्भैर्दशांगुलीपरिमि

प्र॰ तद्देशं प्राच्यादिषु परिस्तरणीया[illegible]प्रतीच्यां चोदगग्रा दर्भाः अवाच्यामुदी
७१ च्यां च प्रागग्राः पूर्वपश्चा[illegible]योरुपरि दक्षिणस्तरणं उत्तरपरिस्त
रणं तु तदद्वयोरधस्तात् नैव [illegible]निपतनं [illegible]एकैकस्यां दिशि चत्वारस्तेवंदे
ङ्शावा ततोऽग्नेर्दक्षिणतो ब्रह्मासनार्थं उत्तरतश्च पात्रासादनार्थं कांश्चित्प्रागग्रदर्भा
न्स्तृणीयात् अग्नेरीशानि[illegible]रं नसापा[illegible]स्तीर्णेषु दर्भेषु दक्षिणस
व्यपाणिभ्यां क्रमेण चरुस्था[illegible]प्रोक्षणी च स्रुवौ प्रणीताज्यपात्रे इध्माबर्हिषी
शूर्पं कृष्णाजिनं मुसलोलूखलं मुस[illegible]वेत्ति द्वे द्वे उदगपवर्गं प्राक्संस्थं वन्युब्जान्यासा राम ७१

दयेत् आज्यमात्रे होमे तु प्रो[illegible]स्रुवौ प्रणीताज्यपात्रे इध्माबर्हिषी त्येतावन्मात्रमेवा
सादनं ततः प्रोक्षणीपात्रमुत्तानं कृत्वा तत्रानंतर्गर्भितसाग्रसमस्थूलप्रादेशमा
त्रकुशद्वयरूपे पवित्रे निधाय मुत्ताभि[illegible]पूर्य[illegible]पयित्वा गंधपुष्पादि क्षिप्त्वा
हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यामुदगग्रे [illegible] त्रिरुत्पूय पात्रा
ण्युत्तानानि कृत्वा इध्मं विस्रस्य सर्वाणि [illegible] प्रोक्षेत् उत्तानेन तु हस्तेन कर्तव्यं प्रो
क्षणं भवेत् अवाचीनेन हस्तेन कुर्यादवेक्षणं मुष्टीकरोत्तु प्रणीतं अ[illegible]
णामितस्त्वतं नाभापः के[illegible]ल्लौ क्षिपेदित्येके ततो यथोक्तलक्षणमीश्वा

प्र०
१२

नादिगवत्स्यिपतंब्राह्मणमस्मिन्कर्मणिब्रह्माणंत्वांवृणइतितस्यापाणिंपाणिनागृही
त्वावृणुयात् ततोब्रह्माव्रतोस्मीत्युक्त्वाप्राङ्मुखोयज्ञोपवीत्याचम्यसमस्तपाण्यं
गुष्ठाभ्यांत्वाग्रेणाग्निंपरीत्यदक्षिणतउदङ्मुखःस्थित्वाआसनार्थंदर्भेषुमध्येदक्षि
णभागस्यमेकंदर्भमंगुष्ठानामिकाभ्यांगृहीत्वानिरस्तःपरावसुरितिनैरृत्यांनि
रस्यापःस्पृष्ट्वाइदमहमर्वावसोःसदनेसीदामीत्युक्त्वोदङ्मुखोएववामोरूपरिद
क्षिणपादंसंस्थाप्योपविश्यगंधाक्षतादिभिरर्चितःसन् ॐ बृहस्पतिर्ब्रह्माब्रह्म
सदनआशिष्यतेबृहस्पतेयज्ञंगोपायसयज्ञंपाहिसयज्ञपतिंपाहिसमांपाहि ६ राम १२

तिजपित्वासदायज्ञमनाएववर्तेत ततोयजमानःप्रणीतापात्रमग्नेःपश्चादुद्धायत
त्रपवित्रेनिधायोत्पूताभिरद्भिःपूरयित्वागंधपुष्पाक्षतानिक्षिप्यमुखसमुद्धृत्याग्ने
रुत्तरतोदर्भेषुनिधायपवित्रेगृहीत्वाप्येदर्भैराच्छादयेत् ततःपश्चादग्नेकुशेषुशूर्पं
निधायततःआग्नेयेपवित्रेनिधायाग्नयेत्वाजुष्टंनिर्वपामीतिमंत्रावृत्त्याव्रीहीणांप
वनांवाश्चतुरःचतुरोमुष्टीन्निरूप्याग्नीषोमाभ्यांत्वाजुष्टंनिर्वपामीतितथैवनिरूप्य
तेपवित्रेव्रीहिणामुपरिनिधायोत्पूताभिरद्भिरग्नयेत्वाजुष्टंप्रोक्षामीतिनिर्वापसंख्य
याप्रोक्षयेत् एवमग्नीषोमाभ्यांत्वाजुष्टंप्रोक्षामीतितथैवप्रोक्षयेत् दर्शेतुअग्नी

प्र०
७३

सोमस्थाने इंद्राग्निभ्यां त्वेत्यादिनिर्वापप्रोक्षणेच विशेषः एवंनाममंत्रकहोमे निर्वापः प्रो
क्षणंचयथाप्रधानदेवतंदेवतानामग्रहणेनकार्यं समंत्रकहोमेतुश्रवणाकर्मादौतूष्णीं
चतुरश्चतुरोमुष्टीन्निर्वपेत्प्रोक्षयेच्च ततःपात्रान्तराणामुत्तरतःप्रागग्रीवमास्तीर्योर्ध्वलोम्नि
कृष्णाजिनेनिहितेउलूखलेमुसलेनपत्न्यावहत्यत्रिःफलीकुर्यात् तान्भिःप्रक्षालिता
न्पृथक्पात्रेएकपात्रेवाअविदग्धमनवस्रावितमंतरूष्मपक्वं सुशृतंचरुंपचेत् ततः
पवित्रआज्यपात्रेनिधायतत्पात्रंपुरतःसंस्थाप्यतस्मिन्नाज्यमासिच्याग्नेरुत्तरतःस्थि
तांगारान्भस्मनासहाग्नेरुदक्परिस्तरणाद्बहिःनिरूह्यतेषुआज्यपात्रमधिश्रित्यज्व राम ७३

गु तादर्भोल्मुकेनावज्वल्यांगुष्ठपर्वमात्रंप्रक्षालितंदर्भाग्रद्वयमाज्येप्रक्षिप्यपुनर्ज्वलताते
नैवदर्भोल्मुकेनचरुणासहाज्यंत्रिःपर्यग्निकृत्वातदुल्मुकमपास्यापःस्पृष्ट्वाज्यपात्रं
भुविकर्षन्निवोदगुद्वास्यांगारानग्नौप्रत्यस्यापःस्पृष्ट्वातत्स्थानेवाज्यंसवितुष्ट्वाहि
रण्यस्तूपःसवितापुरउष्णिक्आज्यस्योत्पवनेविनियोगः सवितुष्ट्वाप्रसवउत्पुनाम्य
च्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरितिमंत्रेणैकमुत्पोत्पवरितेनैकवारंद्विस्तूष्णीमु
त्तानपाणिद्वयांगुष्ठोपकनिष्ठिकाभ्याममंत्रयोरसंस्पृष्टगृहीताभ्यामुदगग्राभ्यांपवि
त्राभ्यांप्रोत्पूयनेपवित्रेअद्भिःप्रोक्ष्याग्नौप्रहरेत्तूष्णींस्कंदायस्वाहेतिमंत्रेणेतिकेचित्

प्र०
१४

अथाग्नेः पश्चात्परिस्तरणाद्बहिरात्मनोऽग्रतो भूमिं प्रोक्ष्य तत्र बर्हिःसन्नहनीं रज्जुमुदग
ग्रां प्रसार्य तस्यां बर्हिः प्रागग्रमुदगपवर्गमविरलमास्तीर्य तस्मिन्नाज्यपात्रं निधाय स्रु
वादि संमार्जयेत् तद्यथा दक्षिणेन हस्तेन स्रुचं स्रुवं वा गृहीत्वा सव्येन कांश्चिद्दर्भानादा
य सहैवाग्नौ प्रताप्य स्रुवं निधाय दक्षिणेन हस्तेन स्रुवस्य बिलं दर्भाग्रैः प्रागाद्यपाग
पवर्गं त्रिः संमृज्याधस्ताद्दर्भाग्रैर्बाह्यात्मं बिलदण्डं त्रिः संमृज्य ततो दर्भाणां मूलैर्दण्ड
स्याधस्ताद्बिलदण्डाद्यारभ्य यावद्दण्डपरिसमाप्ति बिलं तावत्त्रिः संमृज्याद्भिः प्रोक्ष्य स्रुवं नि
धायाज्यस्थाल्या उत्तरतः स्रुगग्रस्तं निधायोदकं स्पृष्ट्वा तैरेव दर्भैर्जुहूं चैवमेव संमृज्य

राम
१५

स्रुवादुत्तरतो निधाय दर्भानद्भिः प्रक्षाल्य दृष्टं निधायोदकं स्पृष्ट्वा लायित्वाग्नावनुप्रहरेत्
ततः श्रुतं चरुं स्रुवं गृहीत्वा तेनाज्येनाभिघार्योदगुद्वास्याग्न्यातपयोर्मध्येन नीत्वाज्याद्दक्षि
णतो बर्हिषि सांतरमासाद्य पुनरप्यभिघार्य न वाभिघार्य हविःपृथक्करणपात्रांत
रं चर्वाज्ययोर्मध्ये निधायैकदशांगुलिपरिमिते देशे गंधाक्षतपुष्पैरग्निं समंत्रमर्च
येत् तत्र मंत्रो विश्वानि न इत्यस्य वसुश्रुतोऽग्निस्त्रिष्टुप् अग्न्यर्चने विनियोगः ॐ विश्वा
नि नो दुर्गहा जातवेदः सिंधुं न नावा दुरितातिपर्षि अग्ने अत्रिवन्नमसा गृणानो३ऽस्मा
कं बोध्यविता तनूनां यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि जातवेदो य

शोऽस्मासु धेहि मभिरग्ने अग्नितत्वमश्यां ततआत्मानंचालंकृत्य हस्तं प्रक्षाल्य इध्मवं
धनरज्जुमिध्मस्थाने निधाय पाणिनेध्ममादाय मूलमध्याग्रेषु स्रुवेण त्रिरभिघार्य
मूलमध्यमयोर्मध्यभागे गृहीत्वा अयंतेवामदेवो जातवेदाग्निस्त्रिष्टुप् इध्महवने वि
नियोगः ॐ अयंत इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्द्धय चास्मान् प्रजया
पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेतिध्ममग्नधाय जातवेदसेऽग्नये इदं न ममेति
त्यजेत् ततः स्रुवेणाज्यमादायाग्नेरायतनस्य वायव्यकोणमारभ्याग्नेयकोणपर्यं
तं प्रजापतये रतिमनसा स्मरन्स्वाहेत्युच्चार्य नैरंतर्येणाज्यधारामग्नविध्मदारू

परि हुत्वा पुनराज्यमादाय ततो नैरृत्यकोणतः ईशानीपर्यंतं तथैव हुत्वा तत्काच स्रुवेणा
ज्यमादायाग्नये स्वाहेत्यग्नेरुत्तरपार्श्वे पूर्वभागे हुत्वा पुनराज्यं सोमाय स्वाहेत्यग्नेर्दक्षिण
पार्श्वे तत्समप्रदेशे हुत्वा पूर्वं निक्षिप्तान्ने चरुमुद्धृत्य पृथक् कृत्य इदमग्नये इदमग्नीषोमा
भ्यामिति चरुभागद्वयमुत्तरसंस्थमभिमृश्यावदानधर्मेण जुहुयात् एवं नाममंत्रक
होमे यथादेवतं विभक्तस्य चरोरभिमर्शः समंत्रकहोमे तु न विभागो नाभिमर्शश्च अथ
अवदानधर्मः स्रुवेण स्रुच्याज्यमुपस्तीर्य प्रथममप्रधानदेवताचरुभागं मध्यादंगुष्ठपर्व
मात्रं तिरश्चीनाभिरंगुष्ठमध्यमानामिकाभिरुदग्रयाभिर्नखसंस्पर्शमकुर्वन्नवदाय द

प्र० ७६ र्व्यामोप्य ततश्चरुपूर्वभागं प्रागग्राभिस्ताभिस्तथैवावदाय दर्व्यामोप्यवत्तस्यं रुविरभि
घार्य दर्वीस्थमवत्तं चाभिघार्य विधूमग्नेर्ज्वालाग्नौ अग्नये स्वाहेत्याज्यभागयोर्मध्यदे
शे तत्र त्यक्तदेशे वा आच्छादयन्निव दर्व्या पार्श्वेण हुत्वा अग्नय इदं न ममेति त्यक्त्वा॥ पुनः
पूर्ववदुत्तरहविर्भागादवदाय ॐ अग्नीषोमाभ्यां स्वाहेति पूर्वाहुतेः प्राग्भागे हुत्वा अ
ग्नीषोमाभ्यामिदं न ममेति त्यजेत् पंचावत्तिनस्तु दर्व्यामुपस्तीर्य मध्यात्पूर्वार्द्धात्पश्चा
र्द्धाच्च त्रिर्हविषोऽवदायाभिघार्य जुहुयात् पंचावत्तिनस्तु जामदग्न्या वत्सा विदा वार्ष्टि
षेणास्तथैव च भार्गवाश्च्यवनाश्चौर्वाः पंचावत्तिन ईरिताः दर्शे तु अग्नीषोमपदस्था राम ७६

ने इंद्राग्निभ्यां स्वाहा इंद्राग्निभ्यामिदं न ममेति विशेषः पुनर्दर्व्यामुपस्तीर्य प्रथमहविर्भा
गस्योत्तरार्द्धतः पूर्ववदाननेनाभ्यो नूचीनाभिरेवांगुलिभिरवदाय दर्व्यामोप्य द्वितीयपु
हविर्भागस्य तथैवावदाय पंचावत्ती तु हविर्भागद्वयेपि उत्तरार्द्धात्पूर्वार्द्धाच्च द्विर्द्विवेर
दाय पात्रस्थमनभिघार्यावत्तं तु द्विरभिघार्य यदस्येति हिरण्यगर्भोऽग्निरतिधृतिः स्विष्ट
कृद्धोमे विनियोगः ॐ यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरं अग्निष्टत्स्विष्टकृद्वि
द्वान्सर्वं स्विष्टं सुहुतं करोतु मे अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां
समर्द्धयित्रे सर्वान्नः कामान्समर्द्धय स्वाहेति हुत्वा त्यक्त्वोत्थायैस्नावीशानदेशे जुहु

प्र०
११

यात् स्विष्टकृतेऽग्नयइदंनममेतित्यागः ततोग्नेरुत्तरतःस्थित्वासमिध्मबंधनरज्जुंविसृज्य
रुद्रायस्वाहेतिहुत्वापःस्पृश्यस्रुवेणप्रायश्चित्ताज्याहुतीःसप्तजुहुयात् तत्रमंत्राः अया
श्चेतिवदमोवामलग्निःपंक्तिःप्रायश्चित्ताज्यहोमेविनियोगः ॐ अयाश्चाग्नेस्यनभिशस्ति
श्चसत्यमित्वमयाअसि अयासावयसाकृतोयासन्नहव्यमूहिषेयानोधेहिभेषजंस्वा
हेत्येकस्रुत्वाजुहुयात् अयसेअग्नयइदंनमम अतोदेवामेधातिथिर्देवागायत्रीविनि
योगःसर्वप्रायश्चित्ते ॐ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमेपृथिव्याःसप्तधामभिःस्वा
हादेवेभ्यइदंनमम इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्रीप्रायश्चित्ते० ॐ इदंविष्णुर्विचक्रमे राम ११

त्रेधानिदधेपदं समूढमस्यपांसुरेस्वाहाविष्णवइदंनमम व्यस्तसमस्तव्याहृतीनांविश्वा
मित्रजमदग्निभरद्वाजप्रजापतयोअग्निवायुसूर्यप्रजापतयोगायत्र्युष्णिगनुष्टुप्
बृहत्यः ॐ भूःस्वाहाअग्नयइदंनमम भुवःस्वाहावायवइदंनमम स्वःस्वाहासूर्यायेदं
नमम भूर्भुवःस्वाहाप्रजापतयइदंनमम ततोब्रह्माकर्तारंपरित्याग्नेशान्यदेशेति
ष्ठन्नेनाप्येवंसप्ताज्याहुतीर्जुहुयात् त्यागंयजमानोनकुर्यात् ततस्तत्रस्थोब्रह्मैवमंत्र
विपर्यासादिनिपतनिमित्तेसमस्तयद्वोदेवाअभितपामरुतस्त्रिष्टुप् मंत्रविपर्यासादि
निपतनिमित्तकप्रायश्चित्ताज्यहोमेविनियोगः ॐ यद्वोदेवाअतिपातयानिवाचाचप्रयु

प्र० १८ तीदेवहेवलं अरायोअस्माँअभिदुच्छुनायतेन्यत्रांछिन्मरुतस्त्वंनिधेतनस्वाहा यजमान
मरुद्भ्यइदंनमम अनाज्ञातमितिमंत्रस्यहिरण्यगर्भोग्निस्त्रिष्टुप् अंअनाज्ञातंयदा
ज्ञातंयज्ञस्यक्रियतेमथु अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथंस्वाहाअग्नयइदंनमम
पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं स्वाहा
अग्नयइदंनमम यत्पाकत्रेत्यस्यत्रितोग्निस्त्रिष्टुप् अंयत्पाकत्रामनसादीक्षनदक्षान
यज्ञस्यमन्वतेमर्त्यासः अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाँऋतुशोयजातिस्वा
हा यजमानःअग्नयइदंनमम स्कंनभिन्नाघमितिएतानि मिलेसति वक्ष्यमाणप्रका राम १८

प्रकारेणतत्तत्प्रतिपदोक्तजपहोमान्कुर्याद्ब्रह्मा ब्रह्मणोभावेयजमानएवैतान्प्रायश्चित्ता
दीन्कृत्वावंसविलंप्रक्षाल्यतस्यांस्रुवबिलंनिधायपुनरधोमुखंन्यस्यैवरदधात् त
तोयजमानःसर्वकर्मप्रपूरणीभद्रद्रव्यदांपूर्णाहुतिंजुहुयात् तद्यथास्रुवेणाज्यंगृही
त्वास्रुवंचविलांप्रक्षाल्यतस्यांस्रुवमूर्ध्वबिलंनिधायपुनरधोबलिंनिक्षिप्यस्रुवाग्ने
कुसुमाक्षतंनिधायसव्यपाणिनास्रुक्स्रुवमूलेनिधायदक्षिणपाणिनास्रुक्स्रुवंश
खमुद्रयागृहीत्वातिष्ठन्समपादऋजुकायःस्कंधवागंत्यस्तदृष्टिःप्रसन्नात्मासमुद्राद्
र्मिरित्येकादशर्चस्यसूक्तस्यवामदेवआपस्त्रिष्टुप् अंत्याजगतीपूर्णाहुतिहोमेविनि

प्र० योगः समुद्रादूर्मिर्मधुमांउदारदुपांशुनस्सममृतत्वमानट् घृतस्यनामगुह्यंयदस्तिजि
१८ ह्वादेवानाममृतस्यनाभिः वयंनामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः उपब्र
ह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत् चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेस
प्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश त्रिधाहितंपणि
भिर्गुह्यमानंगविदेवासोघृतमन्वविंदन् इंद्रएकंसूर्यएकंजजानवेनादेकंस्वधयानिष्ट
तक्षुः एताअर्षंतिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे घृतस्यधाराअभिचाकशी
मिहिरण्ययोवेतसोमध्यआसां १ सम्यक्स्रवंतिसरितोनधेनाअंतर्हृदामनसापूयमा राम १८

नाः एतेअर्षंत्यूर्मयोघृतस्यमृगाइवक्षिपणोरीषमाणाः सिंधोरिवप्राध्वनेशूघनासोवात
प्रमियःपतयंतियह्वाः घृतस्यधाराअरुषोनवाजीकाष्ठाभिंदन्नूर्मिभिःपिन्वमानः अभि
प्रवंतसमनेवयोषाः कल्याण्यःस्मयमानासोअग्निं घृतस्यधाराःसमिधोनसंतताज्जुषा
णोहर्यतिजातवेदाः कन्याइववहतुमेतवाउअंज्यंजानाअभिचाकशीमि यत्रसोमःसूयते
यत्रयज्ञोघृतस्यधाराअभितत्पवंते अभ्यर्षतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणाध
त्त इमंयज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवंते धामंतेविश्वंभुवनमधिश्रितमंतः
समुद्रेहृद्यंतरायुषि अपामनीकेसमिथेयआभृतस्तमश्याममधुमंतंतऊर्मिं २ समुद्रा

प्र० दूर्मिरित्यादिमंधुमंतऊर्मिस्वाहेतिपठन्यववपरिमितधारांसंततांस्त्रुगग्रेणसशेषंहुत्वाऽ
८० ग्नयइदंनममेत्युक्त्वाविज्ञ्यानिषेत्यस्यप्रजानोनेदुरेवाःशिशितेभंगेरक्षसोविनिक्षेविज्ञ्यानिषा
वृहतेत्यनेनचावसिष्टंहुत्वाअग्नयइदंनममेतित्युक्त्वा ॐ विश्वेभ्योदेवेभ्यःस्वाहेतिसंस्रा
वंहुत्वा विश्वेभ्योदेवेभ्यइदंनमम ततस्तंडुलचरुकपालस्थमिदर्भशकलान्यद्भिःप्रोक्ष्या
ग्नौप्रहरेत् पूर्णाहुत्वाद्येतदंतंसमूलंयथोग्रपारिजातकारेणलिखितमपिइदानींशि
ष्टान्नकुर्वंति अथावभृतस्यपूर्णपात्रजलेनमार्जनंकुर्यात् तद्यथापूर्वोसादितंपूर्ण
पात्रमास्तीर्णेबर्हिषिदक्षिणपाणिनानिधायतत्रगंगाद्याःपुण्यनदीःस्मरन्दक्षिणे राम ८०